COUNTRY (adj.) : I. As opposed to city : ग्राम्यः (म्या, म्यं), *c. mouse* : ग्राम्यमूषिकः ; *c. town* : *ग्राम्यपत्तनम् *or* खर्वटम् ; *c. - house* : *ग्राम्यभवनम् ; *to lead a c. life* : ग्रामेषु जीवनमतिवाहयति (?). II. Rude : q.v. : ग्राम्यः (म्या, म्यं). III. Of a c.: देशीयः (या, यं).

COUNTRY-FOLK : (1) ग्राम्यजनाः (m. pl.); (2) ग्राम्याः (m. pl.) : v. Rustic.

COUNTRYMAN : I. A rustic : q.v. II. An inhabitant of a country : देशीयः (या, यं) *or* देशवासिन् (f. नी), *one's own c.* : स्वदेशीयः (या, यं).

COUNTY : प्रदेशः (?), *c. town* : पत्तनम् (?).

COUP-DE-MAIN : Ph. : *by c.* : अतर्कितं द्रुततरमवस्कन्द्य (?).

COUP-D'ETAT : *आकस्मिकनीतिकौशलम्.

COUPLE (subs.) : I. A pair : q.v. : युग्मम्. II. Of animals : (1) मिथुनम्, *c. s of the ruddy goose* : मिथुनानि रथाङ्गनाम्नाम्, Ki. ; (2) द्वन्द्वम्, *in c. s* : द्वन्द्वीभूय, A.r. ; (3) दम्पती (m. dual) (man and wife) ; (4) वधूवरम् (a newly married c.), Ku. III. A bond or leash : q.v.

COUPLE (v.i.) : संयोजयति (युज्, c. 10) : v. To join.

COUPLE (v.i.) : v. To copulate.

COUPLET : पंक्तिद्वयम् (?). *C. of two slokas* : युग्मकम्.

COURAGE : (1) शौर्यम् (=valour) ; (2) निर्भीकता (=intrepidity) ; (3) साहसम् (=boldness). *To lose c.* : सत्वात् परिभ्रश्यते, Mr. *To inspire with c.* : उत्साहयति (c. of सह्), Ku. xv. 51. *To take c.* : सम्-आश्वसिति (श्वस्, c. 2), Ki.

COURAGEOUS : v. Brave, valiant, intrepid, spirited.

COURAGEOUSLY : v. Bravely, valiantly, fearlessly.

COURIER : (1) जङ्घाकरिकः *or* जङ्घालः ; (2) वार्तावहः (=any message-bearer); (3) लेखहारः (=letter carrier).

COURSE (subs.) : I. Motion : q.v. : (1) गतिः, *the c. of his chariot was not interrupted*: गतिर्विजग्ने नहि तद्रथस्य. R. v. 27. ; (2) प्रवाहः (=flowing c., as of rivers) : Ph. : *look, so the balloon bends its c.*: प्रवर्तते पश्य तथा विमानम्, R.; *directed the c. of the car towards the capital* : राजधानीं रथस्यदस्य लक्ष्यीचकार, N. II. Track, way : q.v. : मार्गः, *c. of an arrow* : मार्गणस्य मार्गः, Ki. III. Race-course : q.v. IV. Method of procedure : गतिः, *there being no other c.* : गत्यन्तराभावात्, D. ii. ; *one who has no c. left* : अगतिकः (का, कं), K. Ph. *take to a sacred c.* : पूतं भजस्व पन्थानम्, Vi. V. Of lectures etc. : Ph. : *a c. of lecture* : *क्रमिकपाठाः. VI. Of dishes : भोजनप्रकारः (or strictly) *भोजनक्रमः. VII. The menstrual c. : ऋतुः. *A woman in her c.* : रजस्वला. Ph. : *as a matter of c.* : प्रकृत्या, U. : v. Naturally ; *he would of c. give his assent* : स नियतमनुज्ञास्यति, Da. v. Indeed, certainly, undoubtedly ; *in the c. of*, expr. by मध्ये or by loc. absol. ; *in the c. of conversation* : कथाप्रसङ्गेन, K. i. 24 *or* कथानुकथनेन, N. v. 13 ; *in the c. of time* : गच्छति काले, K. *or* कालक्रमेण, Ku. ; *in due c.* : क्रमेण, K.

Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COURSE (v.) : I. To hunt, pursue : q.v. II. To run : q.v. : धावति, प्र-, (धाव्, c. 1.).

COURSER : I. A hunter : q.v. : जवनवाजिन् (m.)

COURT (subs.) : I. An enclosed space : (1) प्रकोष्ठः, *a dwelling with eight c.s* अष्टप्रकोष्ठकं भवनम्, Mr. ; (2) चत्वरम् (=a front c.) : v. Yard. II. A palace : q.v. : राजकुलम्, *we will go and represent in the c.* राजकुलं गत्वा निवेदयावः, Mr. II. *C. dress* राजदर्शनोचितो वेशः, and sim. comp.s. III. The men about a king : राजसन्निधिलोकाः (m. pl.), P. IV. Their assembly : सभा, *to hold a c.* सभां करोति, Mah. V. Attention, civility : q.v. VI. A c. of justice : (1) विचारालयः ; (2) अधिकरणम्, Mr. ; (3) व्यवहारमण्डपः, Mr. ; (4) धर्माधिकरणस्थानम्, P. VII. A judge or judges : (1) अधिकरणिकः, *this is to be asked by men, not by the c.* : जनस्य प्रच्छनीयोऽयमर्थः, न पुनरधिकरणिकस्य, Mr. ; (2) धर्माधिकारिन् (m), *the c. said to him* : धर्माधिकारिणस्तमूचुः, P.

COURT (v.t.) : I. To pay c. to : आराधयति (c. of राध्), *c. ing the people* : आराधनाय लोकानाम्, U. II. To solicit, seek : q.v. III. To woo : q.v.

COURT-DAY : *व्यवहारदिनम् ; अधिवेशनदिवसः.

COURT-MARTIAL : *युद्धाधिकरणम् ; योधविचारसभा.

COURTEOUS : (1) दक्षिणः (णा, णं) (=complaisant) ; (2) विनीतः (ता, तं) (=polite) ; (3) प्रियंवदः (दा, दं) (=affable) ; (4) सुजनः (=civil).

COURTEOUSLY : (1) सविनयम् ; (2) सप्रश्रयम् ; (3) सौजन्येन.

COURTEOUSNESS : v. Courtesy (I).

COURTESAN : (1) गणिका ; (2) वाराङ्गना, and sim. comp.s ; (3) वारविलासिनी. *A chief c.* वारमुख्या, Me. ii. 10 : v. Prostitute.

COURTESY : I. Courteousness : (1) दाक्षिण्यम्, *by her politness, c., and affability* : तस्या विनयेन दाक्षिण्येन मधुरालापितया. K. ; (2) विनयः ; (3) प्रश्रयः, *accepted with c.* : सप्रश्रयं प्रतिजग्राह, K. ; (4) सौजन्यम्. *c., agreeable as free from arrogance* : अपगताभिमानमधुरा सुजनता. K. II. An act of c. : उपचारः, *by c.s to the invited ladies* : उपचारेण निमन्त्रितस्त्रीषु, C. III. A bow : प्रणामः, R. vi. 25.

COURTIER : I. A member of a princely court : (1) राजसन्निधिलोकः ; (2) राजवल्लभः ; and sim. comp.s. II. A flatterer : q.v.

COURTLY : I. Relating to a court : expr. by comp. II. Well-bred : q.v. III. Obsequious : q.v.

COURTSHIP : no equiv. : expr. by प्रणयः *or* आसक्तिः.

COURTYARD : (1) अङ्गनम् ; (2) प्राङ्गणम् ; (3) चत्वरम् ; (4) अजिरम्.

COUSIN : (1) पितृव्यपुत्रः (f. त्री) (=father's brother's child) ; (2) पितृस्वस्रीयः (f. या) (=f. sister's c.) ; (3) मातृस्वस्रीयः (f. या) (=mother's s. c.) ; (4) मातुलपुत्रः (f. त्री) (=m. brother's c.).

COVE : वङ्कः (?).

COVENANT (subs.) : संविद् (f.) : v. Agreement.

COVENANT (v.) : संविदं करोति : v. To agree, bargain.

COVER (v.t.) : I. To overspread : (1) छादयति, आ-, समा-, प्र-, (छद्, c. 10.), *c. him with this wrapper* : अनेन प्रावारकेण छादयैनम्, Mr. ; i. (2) आवृणोति, समा-, (rarely प्रा-, सं-, नि-,) (वृ, c. 5.), *c.ed with darkness* : तिमिरावृतः (ता, तं), M.n. ; *c. ed face* : संवृतमुखम्, K. ; (3) अपि-दधाति, पि-, (धा, c. 3.) *c. ing his head with a wing* : शिरः पिधाय पक्षेण, N. ; (4) स्तृणाति *or* स्तृणोति (स्तृ *or* स्तॄ, c. 9. and 5.) (rare), *c. ed the ground with their hands* : शिरोभिर्महीं तस्तार, R. iv. 63.; (5) आचिनोति, समा-, (चि, c.5.) (rare), *c. ed with bunches of flowers* : कुसुमस्तवकाचितः (ता, तं) ; (6) उर्णोति, प्र-, (उर्णु, c. 2.) (rare), B. ; (7) स्थगयति (स्थग्, c. 10.) (rare). Ph. : *c. ed with wounds* : क्षतविक्षतः (ता, तं). II. To conceal : q.v. (1) आच्छायति, प्र-, *by what means shall I c. this failing* : केनोपायेन स्खलितमिदं प्रच्छादयमि, K. ; (2) आ-वृणोति, सं-, M.n. ; (3) पिदधाति, Si. *C. ed way* : छन्नपथः *or* गूढमार्गः. III. To protect : q.v. : रक्षति (रक्ष्, c. 1.), *to c. the rear* : पृष्ठदेशं रक्षितुम्, M.n. IV. To brood : आवृणोति (?). V. To be sufficient for : v. Sufficient. VI. To include : q.v. VII. To copulate with : q.v.

COVER (subs.) : I. C. ing, lid : q.v. *C.* (of a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

book) वेष्टनम्, C. II. Fig., screen : (1) आवरणम्; (2) आच्छादनम्; (3) पिधानम्. III. Shelter, protection : q.v.: expr. by verb, (*women are*) *under c. of their father during their childhood* : पिता रक्षति कौमारे, M. Ph. : *under c. of the night* : रात्रियोगेन. IV. Pretext : q.v. V. For game : no equiv. : वनम् : v. Wood.

COVERING (subs.) : (1) आवरणम्, *c. of the body* : देहावरणानि, Ki. ; (2) आच्छादनम्, *give me also your under-garment and c.* : परिधानाच्छादनवस्त्रमपि समर्पय, P. ; (3) पिधानम् (not used of clothes) : v. Clothing, cloak.

COVERLET : (1) उत्तरच्छदः ; (2) प्रच्छदपटः ; (3) उपर्यास्तरणवस्त्रम्, M.n.

COVERT (adj.) : I. Secret : q.v. : प्रच्छन्नः (न्ना, न्नं). II. Protected, as a fence c. : रक्षितः (ता, तं).

COVERT (subs.) : 1. A shelter : q.v. II. A thicket : q.v. III. Of wings of birds : perh. : पक्षतिः, N.

COVERTLY : छन्नम्, D. : v. Secretly.

COVET : (1) लुभ्यति, -ते (लुभ्, c. 4.) (with dat.) (in bad sense), *yet Rama c. ed the stag* : तथापि रामो लुलुभे मृगाय, H. ; (2) स्पृहयति (स्पृह्, c. 10.) (=to long for, desire : q.v.). *I c. this (child)* स्पृहयाम्यस्मै. Sa. vii. ; (3) गृध्यति (गृध्, c. 1.) (rare), *he who would c. me* : यो मां गृध्येत Mah.

COVETABLE : स्पृहनीयः (या, यं) : v. Desirable.

COVETOUS : I. In bad sense : (1) लुब्ध (f. ब्धा), *c. of riches* : धनलुब्धः (f. ब्धा), H. ; *a c. man* : लुब्धकः, P. ; (2) लोभिन् (f. नी) ; (3) लोभवत् (f. ती) ; (4) गृध्नु (mfn) (rare). Ph. : *your mind is c.* : तृष्णातरलं भवन्मनः, N. *Very c.* : (1) लोलुभः (भा, भं) ; (2) लोलुपः (पा, पं). II. In good sense, =desirous : q.v. : लिप्सु (mfn.).

COVETOUSLY : (1) लोभात् ; (2) लोभेन ; (3) expr. by adj.

COVETOUSNESS : लोभः, *c. creates thirst* : लोभो जनयते तृषाम्, H. : v. Desire, avarice.

COVEY : कुलम् : v. Flock.

COW (subs.) : गो (mf.) *c.'s milk* : गोदुग्धम् ; *killing a c.* : गोहत्या ; *milch c.* : धेनुः. *C.-dung* : (1) गोमय (mn.); (2) गोविष् (f.). *Dry c.*: करीर (mn.)

COW (v.) : v. To stupefy, terrify. *C. ed down* : (1) जडीभूतः (ता, तं) ; (2) सन्त्रस्तः (स्ता, स्तं).

COW'HERD : (1) गोपः ; (2) वल्लवः ; (3) आभीरः ; (4) गोपालः. *A station of c.s* : (1) घोषः ; (2) आभीरपल्लिः. *C. ess* : (1) गोपी ; (2) वल्लवी.

COW'HIDE : I. Lit. : गोचर्मन् (n.). II. A whip : गोचर्मनिर्मिता कशा.

COW-HOUSE, COW-PEN : (1) व्रजः ; (2) गोष्ठम् ; (3) गोशाला ; (4) गोकुलम्.

COWARD : (1) कापुरुषः, H. ; (2) भीरुः, *whether he was a c. or a hero* : स भीरुः शूरो वा, Ve iii. : v. Timid.

COWARDICE : (1) भीरुता, *from c.* भीरुतया, Mr. ; (2) कातर्यम् (=timidity), *simple policy is c.* : कातर्यं केवला नीतिः, R. ; (3) कुविक्रमः (towards the weak), *your c. to a poor bird* : कुविक्रमं ते कृपणे पतत्रिणि, N. ; (4) अपौरुषम् (=unmanliness).

COWARDLY : I. Lit. : (1) भीरु (mfn.) v. Timid ; (2) निर्वीर्यः (र्या, र्यं) ; (3) अपौरुषः (षा, षं) : v. Unmanly. II. Mean, base : q.v. : कृपणः (f. णा).

COWER (v.i.) : भयावनम्रशरीरः (रा, रं) ; भयावनतः (ता, तं).

COWL : शिरस्कविशेषः : v. Head-dress.

COWSHIP : ओषधिभेदः ; *गोकन्दः.

COXCOMB : I. A fop : q.v. : दाम्भिकः (?). II. A plant : मयूरचूडा *or* मयूरकः.

COXCOMBRY : (1) नागरिकता (?) ; (2) दम्भः (?).

COY : अप्रगल्भः (ल्भा, ल्भं) : v. Modest, reserved.

COYLY : (1) अविश्रम्भम् (=without confidence); (2) सव्रीडम् (=bashfully, modestly : q.v.).

COYNESS : (1) अविश्रम्भता (want of confidence), K. ; (2) व्रीडा (=bashfulness, modesty : q.v.).

COZEN : छलयति (छल्, c. 10.) : v. To cheat.

COZENAGE : छलना : v. Cheating.

COZILY : आरामेण *or* सारामम् (?) : v. Comfortably.

COZY : आराम-, *c. seat* : आरामासनम् (?) : v. Comfortable.

CRAB : (1) कर्कटः ; (2) कुलीरः. *C.*, i.e. *c.-apple* : कपित्थः (?).

CRABBED I. Harsh, cross : q.v. II. Difficult, perplexing : q.v.

Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CRABBEDLY : v. Peevishly ; with difficulty.

CRABBEDNESS : v. Peevishness ; roughness ; perplexity.

CRACK (v.i.) : I. To break into pieces : q.v : त्रुटति (त्रुट्, c. 6.). II. To rattle : q.v. : विरौति (रु, c. 2.). III. To boast : q.v.

CRACK (v.t.) : I. To break, burst : q.v. : त्रोटयति (c. of त्रुट्). II. To snap : q.v. : स्फोटयति, आ-, (c. of स्फुट्). III. To puff : q.v. Ph. : *to c.a joke* : परिहासं करोति.

CRACK (subs.) : I. Chink : छिद्रम्, *c. in a wall* : भित्तिच्छिद्रम्, Mu. ii. II. A sound : q.v. : विरावः. III. A crazy person : v. C.-brained. IV. A boaster : q.v. : विकत्थिन् (m).

CRACK-BRAINED : हतज्ञानः (ना, नं) : v. Mad, foolish.

CRACKER : a firework : *स्फोटकः.

CRACKLE (v.i.) : चटचटायते (nomi.), *continuously c. ing sesamum, white mustard seed, etc.* : निरन्तरचटचटायितान् तिलसिद्धार्थकादीन्, D.

CRACKLING (subs.) : I. A rattle : q.v. : चटचटायितम्. II. The rind of roast pork : शूल्यशूकरमांसस्य त्वक्.

CRACKNEL : a kind of biscuit : *मुडमुडी.

CRADLE (subs.) : I. Lit. : no equiv. : शिशूनां दोला : v. Swing. Ph. : *from one's c.* : आ शैशवात् : v. Childhood ; *an infant in the c.* : क्रोडस्थः *or* स्तनन्धयः शिशुः. II. Fig., abode : q.v. : आवासः.

CRADLE (v.t.) : लालयति (c. of लल्) : v. To nurse.

CRAFT : I. Art, occupation : q.v. : कला, *I learnt it as a c., but it is my livelihood now* : कलेति शिक्षिता जीविकेदानीं संवृत्ता, Mr. ii. II. Cunning, artifice : q.v. : कौशलम्. III. A small vessel : (1) नौः ; (2) तरी.

CRAFTILY : चतुरम् : v. Cunningly.

CRAFTINESS : (1) वैदग्ध्यम् ; (2) चातुर्यम् : v. Cunning, artifice.

CRAFTSMAN : कारुः : v. Artisan, mechanic.

CRAFTY : (1) विदग्धः (f. ग्धा) ; (2) चतुरः (रा, रं) : v. Cunning.

CRAG : I. Rock, cliff : q.v : कूटः. II. Neck : q.v.

CRAGGED, CRAGGY : I. Rugged, rough : q.v. II. Rocky : q.v.

CRAM (v.t.) : I. To fill to excess : *c. med with houses* : गृहसंबाधः (धा, धं), V.p. ; *the forest was c. med with the attendants of Śiva* : वनं गणैरविच्छेदनिरुद्धम्, K. ; *c. ming the belly with sweetmeats* : मोदकैः कुक्षिं पूरयित्वा, Mal. : v. To fill, stuff. II. Of special instruction : *विशेषशिक्षां ददाति (दा, c. 3.) (?), *c. mer* *विशेषशिक्षादातृ (m.).

CRAM (v.i.) : *विशेषशिक्षां गृह्णाति (ग्रह्, c. 9.) (?).

CRAMP (subs.) : A restriction : q.v. II. C.-iron : वक्रलौहः (?). III. Spasm : q.v.

CRAMP (v.) : I. To check : q.v. II. To fasten : q.v. III. To afflict with c. : संकोचति (कुच्, c. 1.) (?). *C. ed* : v. Crooked.

CRANE : I. The bird : (1) सारसः (the Indian c.) ; (2) कर्करेटुः (the Numidian c.). II. A Machine for hoisting : *उत्तोलनयन्त्रम्.

CRANK : I. An iron elbow : वक्रभागः (?). II. Bend, turning : q.v.

CRANNIED : छिद्रपूर्णः (र्णा, र्णं).

CRANNY : छिद्रम्.

CRAPE : वस्त्रविशेषः.

CRAPULENCE : महातङ्कः (?) ; अतिपानजनिता वमनेच्छा.

CRAPULENT, CRAPULOUS : मदविह्वलः (ला, लं) (=drunk : q.v.).

CRASH (subs.) : महाशब्दः : v. Sound, noise.

CRASH (v.t.) : चूर्णयति (चूर्ण्, c. 10.) : v. To break, crush.

CRASH (v.i.) : महाशब्देन भज्यते (pass. of भञ्ज्) : v. To clatter.

CRASIS : in grammar : *संयोगः.

CRASS : v. Gross, thick.

CRATE : v. Basket.

CRATER : of a volcano : मुखम् (?).

CRAUNCH : दन्तैः निष्पीडयति (पीड्, c. 10.), B. : v. To crush, chew.

CRAVAT : v. Neck-cloth.

CRAVE : I. To beg, implore : q.v. II. To long for : q.v.

CRAVEN : कापुरुषः : v. Coward.

CRAVING (subs.) : लालसा : v. Longing.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CRAW : v. Crop. (II).

CRAWFISH, CRAYFISH : चिङ्गेटः (?) ; मत्स्यविशेषः.

CRAWL (v.) : I. Of men : (1) रिङ्गति (रिङ्ग्, c. 1.), *they then used to c. about in the cowpen* : रिङ्गितौ तौ तदा व्रजे, V.p. ; (2) जानुभ्यां रंहति (रंह्, c. 1.), S. ; (3) जानुभ्यां कराभ्यां च भुवं संघृष्य सञ्चरति (चर्, c. 1.), V.p. com. II. Of animals : सर्पति, प्र-, (सृप्, c. 1.). *C. up to* : उपसर्पति.

CRAWL, -ING (subs.) : (1) रिङ्गनम् (of boys etc.); (2) सर्पणम् (of reptiles).

CRAWLER : i.e. a crawling animal : सरीसृपः.

CRAYON : वर्तिका (=pencil) ; कठिनी (=chalk.)

CRAZE (v.) : I. To crush, grind : q.v. II. To confuse : q.v.

CRAZED, CRAZY : I. Decrepit, feeble : q.v. II. Mad : q.v. : क्षिप्तः (प्ता, प्तं).

CRAZINESS : I. Feebleness : q.v. II. Madness : q.v. : क्षिप्तता.

CREAK (v.) : कडकडायते (nomi.) (?) ; विरौति (रु, c. 2.).

CREAK,-ING (subs.) : कडकडायितम् (?) ; विरावः.

CREAM : I. Lit. : सरः (?). II. Fig. : सारः : v. Essence.

CREAM-COLOURED : i.e. light yellow : आपीतः (ता, तं).

CREASE (subs.) : (1) भङ्गिः ; (2) ऊर्मी.

CREASE (v.) : भङ्गिं करोति (?) : v. To fold, wrinkle.

CREATE : I. To call into being : सृजति (सृज्, c. 6.), *c.d water first* : अप एव ससर्जादौ, M. i. 8. ; *to c. pain* : व्यथां सृजति, N. iv. II. : v. To cause. II. To conceive by the mind : (1) सृजति, *by whom this story is c.d* : येनेयं कथा सृष्टा, K. ; (2) निर्-मिमीते (मा, c. 3.), *poet's c. -ion* : कवेर्निर्मितिः, Kav. III. To make, appoint : q.v. : करोति. *Tungabala was c.d. a governor* : तुङ्गबलो भोगपतिः कृतः, H.

CREATION : I. Lit. : (1) सृष्टिः ; (2) सर्गः, *the sole cause of the c. continuation and destruction of the world* : विश्वस्य सर्गस्थितिप्रलयानामेकं कारणम् ; (3) सृजनम्. II. Fig., as of a poet : (1) सृष्टिः ; (2) निर्माणम् *or* निर्मितिः. III. A thing created : सृष्टिः, *as if the first c. of God as regards women* : युवतिविषये सृष्टिराद्येव धातुः, Me. ii. 21. IV. Appointment : q.v.

CREATIVE : Ph. : *c. power* : सृजनशक्तिः ; निर्माणशक्तिः.

CREATOR : I. Lit. : स्रष्टृ (f. ष्ट्री) ; (2), सृज् in comp., *c. of the world* : विश्वसृज् (mfn.), R. II. The Supreme Being : (1) विधातृ (m.) ; (2) विश्वसृज्, विश्वकृत्, and sim. comp.s III. Maker, originator : q.v. : (1) कर्तृ (f. त्री) ; (2) विधातृ (f. त्री).

CREATURE ; I. A created being : सृष्टपदार्थः. *Living c.* : प्राणिन् (m.). : v. Animal. II. A term of contempt : जन्तुः. III. A term of endearment : जातः (ता, तं), D. IV. A tool, dependant : q.v. : आश्रितः (ता, तं). Ph. : *being my c.* : मत्तो लब्धोदयः (या, यं), M.n.

CREDENCE : विश्वासः : v. Belief. *To give c. to* : विश्वासं करोति : v. To believe.

CREDENTIALS : *विश्वासोत्पादिका ; श्रद्धाजननपत्रम्.

CREDIBILITY : (1) विश्वास्यता, *from the c. of the great sage* : विश्वास्यतया महर्षेः, Ki. iii. 34. ; (2) विश्वसनीयता ; (3) विश्वासयोग्यता ; (4) श्रद्धेयता.

CREDIBLE : (1) विश्वास्यः (स्या, स्यं) ; (2) विश्वसनीयः (या, यं) ; (3) विश्वासयोग्यः (ग्या, ग्यं) ; (4) श्रद्धेयः (या, यं), *this is not c.* : अश्रद्धेयमेतत्, Sa. v.

CREDIT (subs.) : I. Belief : q.v. : विश्वासः. II. Esteem, reputation : q.v. : प्रतिष्ठा. Ph. : *it reflects c. on you* : एतत्ते दाक्ष्यं दर्शयति *or* त्वां प्रतिष्ठापयति (?). III. Authority : प्रामाण्यम्. IV. In a commercial sense : *विश्वासः, *to sell on c.* : *विश्वासेन विक्रीणीते. Ph. : *c. side* (of an account) *प्राप्तधनभागः.

CREDIT (v.) : I. To believe : q.v. II. To enter upon the c. side : *प्राप्तधनभागे लिखति.

CREDITABLE : श्लाघ्यः (घ्या, घ्यं) : v. Honourable. Ph. : *c. to you* : तव गौरवकरः (री, रं).

CREDITABLY : v. Honourably, well.

CREDITOR : (1) उत्तमर्णः ; (2) ऋणदातृ (m.).

CREDULITY : (1) विश्वासशीलता ; (2) विश्रम्भप्रवणता ; (3) श्रद्धालुता.

CREDULOUS : (1) विश्वासशीलः (ला, लं) ; (2) विश्रम्भप्रवणः (णा, णं) ; (3) श्रद्धालु (mfn.)

Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CREDULOUSLY : expr. by adj. or by ins. of subs.

CREED : धर्मः.

CREEK : (1) वङ्कः ; (2) खातम् (?).

CREEP : I. To crawl : q.v. II. To move slowly : मन्दं मन्दं सर्पति (सृप्, c. 1.). III. Of plants : (1) विसर्पति ; (2) चरति (चर्, c. 1.), *c. ing on the ground* : भूचरः, Nil. IV. To fawn : q.v. Ph. : *to c. into the mind* : मनसि आविर्भवति.

CREEPER : (1) लता (gen. term.) ; (2) वीरुध् (f.) ; (3) वल्ली ; (4) व्रततो *or* ति (f).

CREMATION : (1) दाहः ; (2) दहनम् ; (3) (fully) शवदाहः.

CREPUSCLE, CREPUSCULAR : v. Twilight.

CRESCENT (adj.) : (1) वर्धिष्णु (mfn.) ; (2) वर्धमानः (ना, नं).

CRESCENT (subs.) : I. Of the moon : (1) अर्धचन्द्रः (=half moon) ; (2) वर्धमाना चान्द्रमसी लेखा, Ku. or sim. शशाङ्कलेखा, and sim. comp.s. II. The Turkish flag : अर्धचन्द्रकेतनम्. III. The Turkish power : अर्धचन्द्रकेतनास्तुरस्काः (m. pl.). IV. Anything c. -shaped : अर्धचन्द्रः.

CRESCENTIC, CRESCENT-SHAPED : अर्धचन्द्राकारः (रा, रं). and sim. comp.s.

CRESS : शाकप्रभेदः.

CRESSET : आकाशदीपः.

CREST : I. Of animals : (1) चूडा ; (2) शिखा. II. Of a helmet : (1) शिखा ; (2) चूडा ; (3) शेखरः. III. Of a mountain : (1) चूडा ; (2) शिखरः : v. Summit.

CRESTED ; (1) शिखिन् (f. नी) ; (2) शिखाधरः (रा, रं) ; (3) चूडावत् (f. ती).

CREST-FALLEN : (1) भग्नचूडः (डा, डं) ; (2) हतौजस् (mfn.).

CRETIN : गण्डकण्ठः (ण्ठा, ण्ठं).

CREVICE : छिद्रम्, *c. of a rock* : ग्रावच्छिद्रम्, D. ii.

CREW : I. A throng : q.v. : गणः. II. A ship's c. : (1) नाविकाः (m. pl.); (2) पोतवाहाः (m. pl.).

CRIB : I. A manger : q.v. : द्रोणी. II. A stall for cattle : गोष्ठम् : v. Cow-house. III. A child's bed : शिशुशय्या : v. Bed. IV. A hut : q.v. : कुटीरः.

CRIBBLE : चालनी : v. Sieve.

CRICK : a kind of sprain : v. Sprain, strain.

CRICKET : I. The insect : (1) झिल्ली, *chirping of the c.* : झिल्लीझङ्कारः, A. r. (2) भृङ्गारी ; (3) चीरी. II. The game : *कन्दुकनोदनक्रीडा. N.B. कन्दुकक्रीडा is a quite dif. game.

CRIER : (1) घोषकः ; (2) उद्घोषकः ; (3) घोषणाकारः, -कः.

CRIME : (1) पापम् (=offence=sin.), *to commit a c. deliberately* : कामतः पापं करोति, M. ; *c.s cannot be checked without punishment* : दण्डाद्ऋते पापविनिग्रहः कर्तुं न शक्यः, M. ; (2) अपराधः : v. Offence ; (3) दोषः : v. Fault ; (4) साहसम् (=daring c.), M.

CRIMINAL : I. Of men : (1) अपराधिन् (f. नी) ; (2) पातकित् (f. नी) : v. Guilty. II. Of acts : (1) सापराधः (धा, धं) ; (2) सपापः (पा, पं) ; (3) by comp., *c. act*: पापक्रिया, K.b. Ph. : *c. law* : *अपराधविधिः ; "*c. conversation*": परस्य पत्न्या रहः सम्भाषा, M.

CRIMINALITY : सापराधता : v. Guiltiness, wickedness.

CRIMINALLY : I. Wickedly : सापराधम्. II. According to criminal law : *अपराधविध्यनुसारेण. Ph. : *to proceed c.* : दण्डनायकं निवेदयति (c. of विद्) (?).

CRIMINATE : I. To accuse : q.v. : अभियुनक्ति (युज्, c. 7.). II. To implicate : q.v.

CRIMINATION : अभियोगः : v. Accusation.

CRIMINATORY : (1) अपवादगर्भः (र्भा, र्भं) ; (2) अभियोगलिप्तः (प्ता, प्तं).

CRIMP (adj.) : I. Brittle : q.v. II. Inconsistent : q.v.

CRIMP (v.) : I. To decoy : q.v. II. To curl : q.v.

CRIMP (subs.) : प्रतारकः (?).

CRIMPLE : v. To contract ; to curl.

CRIMSON : शोणः (णा, णं) : v. Red.

CRINGE : Ph. : *who is always c. ing* : योऽहर्निशमुपरचिताञ्जलिः स्तौति, K. ; *c. before Lakshmaṇa* : सौमित्रेश्चरणौ भज, Vi. *C. ing* : आपादपद्मप्रणतः (ता, तं), R. : v. To Bend, bow.

CRINGINGLY : पादयोः पतित्वा ; अञ्जलिं बद्ध्वा ; etc.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CRINOLINE : i.e. a lady's skirt expanded : *सरी.

CRIPPLE (subs. or adj.) : पङ्गु (mfn.) (=lame : q.v.) ; (2) विकलः (ला, लं) (=wanting any limb), *carrying the c. on his shoulders* : तं विकलं स्कन्धेनोद्वह्य, D. vi. ; (3) विकलाङ्गः (f. ङ्गी) (= विकल).

CRIPPLE (v.t.) : I. Lit. : विकलीकरोति, *who has c. d my husband* : येन मे पतिर्विकलीकृतः, D. : v. To lame, disable. II. To impair, weaken : q.v.

CRIPPLING : i.e. a spar for support : उपस्तम्भः (?).

CRISIS : सङ्कटम्, *c. of an affair* : कार्यसङ्कटकम्, K. Ph. : *at this c.* : तस्मिन् क्षणे *or* अत्रान्तरे, K.

CRISP, CRISPY (adj.) : भङ्गुरः (रा, रं) : v. Curly, brittle.

CRISP (v.) : To curl ; to interweave. "*C. ed* (brook)" तरङ्गितः (ता, तं).

CRISPNESS : भङ्गुरता.

CRISS-CROSS-ROW : (1) मातृका ; (2) सिद्धिफला : v. Alphabet.

CRITERION : लक्षणम् : v. Sign, mark.

CRITIC : I. One who criticizes : गुणदोषविचारकः. (?). II. One skilled in criticism : गुणदोषकोविदः; गुणदोषविचारपण्डितः; etc. III. A carper : दोषैकदृश् (mfn.).

CRITICAL : I. Relating to criticism : expr. by comp., *c. dissertation*: गुणदोषविचारप्रबन्धः. II. Possessing skill to criticize : गुणदोषविचारकुशलः (ला, लं), and sim. comp. s (?). *C. power* : गुणदोषविचारशक्तिः (?). III. Captious, fastidious: q.v. IV. Belonging to a crisis : Ph : *c. position*: सङ्कटम्; *whose intellect does not fail in c. circumstances*: कार्यसङ्कटेष्वविषण्णधीः, K. ; *c. philosophy* : *कण्ठदर्शनम्.

CRITICALLY : I. In a critical manner : गुणदोषान् विचार्य ; सूक्ष्मम् (=minutely, carefully). II. At a crisis : सङ्कटे.

CRITICISE, CRITICIZE : I. To examine as a critic : गुणदोषान् विचारयति (चर्, c. 10.) II. To pass criticism on : समालोचयति (लोच्, c. 10.) (?). III. To censure : q.v.

CRITICISM : I. The art : गुणदोषविचारः (?). II. Review : *समालोचनम्; गुणागुणवादः. III. Censure : q.v.

CRITIQUE : गुणदोषविचारप्रबन्धः (?), and sim. comp. s.

CROAK (v.) : I. As frogs or crows : (1) रटति (रट्, c. 1.), *the crow is much c. ing gratingly*: काकः कटूच्चैः खलु रारटीति, Ch. ; (2) मकमकायते (nomi.) (of frogs), J. ; (3) शब्दं करोति (=to make any sound), *when I will c.* : यदाहं शब्दं करोमि, H. : v. To cry. II. To grumble: मकमकायते (?).

CROAK, -ING (subs.) : I. Lit. : भेकनादः (of frog.) ; (2) काकशब्दः (of crows) : v. Cry. II. Fig. : मकमकायितम् (?) : v. Complaint.

CROAKER : i.e. grumbler : q.v.

CROCK : I. A pot : q.v. : "*c. of gold*" : हिरण्मयपात्रम्. II. Soot : q.v.

CROCKERY : मृन्मयपात्राणि (n. pl.) : v. Earthenware.

CROCODILE : (1) कुम्भीरः ; (2) नक्रः. Ph. : "*c. tears*" : कृत्रिमाश्रूणि (n. pl.).

CROCUS : कुङ्कुमलता (a species of c.).

CROFT : वृतिः : v. Enclosure.

CRONE : (1) वृद्धा ; (2) जरती.

CRONY : सुहृद् : v. Friend.

CROOK (subs.) : I. A bend or turn : q.v. II. A shepherd's staff : दण्डः. Ph. : *by hook or by c.* : येन केन प्रकारेण.

CROOK (v.) : वक्रीकरोति (कृ, c. 8) : v. To bend.

CROOK-BACK : (1) कुब्ज (f. ब्जा) ; (2) न्युब्ज (f. ब्जा) ; (3) गडुरः (रा, रं) ; (4) वक्र (f. क्रा), V. p.

CROOKED (adj.) : I. Not straight : (1) वक्र (f. क्रा) ; (2) कुटिलः (ला, लं) ; (3) वक्रिमः (मा, मं) ; (4) अरालः (ला, लं) ; (5) जिह्म, वि-, (f. ह्मा) ; (6) वृजिनः (ना, नं). II. In moral sense : (1) वक्र (f. क्रा) (rare), *c. nature* वक्रभावः, N. ; (2) कुटिलः (ला, लं), *c. minded* कुटिलमति (mfn.), Mu. ; (3) जिह्म (f. ह्मा), *yet that c.* (man.) : तथापि जिह्मः सः, Ki. ; (4) अनृजु (mfn.).

Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CROOKEDLY : (1) वक्रम् ; (2) कुटिलम् ; (3) जिह्मम् : v. Awry.

CROOKEDNESS : (1) वक्रता ; (2) वक्रिमन् (m.) ; (3) कौटिल्यम् ; (4) विजिह्मता ; (5) कुटिलता ; (6) जैह्म्यम् ; (7) अनृजुता.

CROP (subs.) : I. The produce of fields : (1) शस्यम्, *yielding all c. s*: सर्वशस्यप्रदः (दा, दं), Nil.; *devastation of c. s*: शस्यघातः, D.; (2) not expr. when any particular c. is meant, *rice c.* : धान्यम्. II. Of birds : कण्ठम् (=throat).

CROP (v.) : I. To cut short : कल्पति (कृप्, c. 1). II. To reap : q.v. : लुनाति (लु, c. 9). III. To nibble : q.v.

CROP OUT : आविर्भवति (भू, c. 1.). v. To appear.

CROP-EARED : छिन्नकर्णाग्र (f. ग्रा), and sim. comp. s.

CROSIER : *क्रुशदण्ड, or sim. दण्डः (when no ambiguity).

CROSS (adj.) : I. Transverse : (1) व्यत्यस्तः (स्ता, स्तं) ; (2) तिरश्चीनः (ना, नं) (=sideways). II. Adverse, contrary : q.v. : प्रतीपः (पा, पं). Ph. : *oh ! how c. is fate* : अहो वामता भागधेयानाम्. Vi. III. Ill-tempered, peevish : q.v. प्रतीपः (पा, पं), *don't get c. with your husband* : भर्तुः प्रतीपं मास्म गमः, Sa. *A c. charge*: प्रत्यभि-योगः, Y.

CROSS (v.t) : I. To pass over : (1) तरति (तॄ, c. 1.), *c. ed the Ganges* : गङ्गां ततार, R. xvi. 52. ; *I want to c. the ocean on a raft* : उडुपेन सागरं तितीर्षुरस्मि, R. ; (2) लङ्घते *or* लङ्घयति, वि,-उत्-, (लङ्घ्, c. 1. and 10.), *c. ed the Vindhya* : विन्ध्यं व्यलङ्घयत्, R. xvi. 32. II. Of the mind, to occur to : q.v. III. To thwart, obstruct : q.v. IV. To mix breeds : perh. संमिश्रयति (मिश्र्, c. 10.). V. To conceal : q.v. VI. To put across, expr. by circumlo., *to c. arms.* : एकस्मिन् भुजे भुजान्तरं विन्यस्यति *or* विदधाति. VII. To draw line across : रेखया अङ्कयति (अङ्क्, c. 10.).

CROSS (v.i.) : *to c. over to Ceylon*: समुद्रमुल्लङ्घ्य सिंहलं गच्छति : v. To cross (I) and go.

CROSS (subs.) : I. An intrument : शूलम् (= stake: q.v.); *क्रुशम्. II. The symbol : *क्रुशम्; व्यत्यस्तरेखाद्वयम्. III. The gospel : q.v. IV. Money : नाणकम्. V. Affliction, trouble : q.v.

CROSS-BILL : पक्षिविशेषः ; *व्यत्यस्तपुटः.

CROSS-BOW : *वक्रचापः. *C. -man* : *वक्रचापभृत् (mfn.) *or* -धरः (री, रं).

CROSS-BREED : खच्चरः (री, रं) (in modern dialects).

CROSS-EXAMINATION : *प्रतीपपरीक्षा ; कूटपरीक्षा (in modern Bengali).

CROSS-EXAMINE : *प्रतीपं परीक्षते (ईक्ष्, c. 1.) ; कूटपरीक्षां करोति (?).

CROSS-GRAINED : प्रतीपः (पा, पं) : v. Morose, perverse.

CROSSING : I. Lit. : तरः, -णम् : v. Passage. *Fare for c.* : (1) तारिकम्, M. ; (2) तार्यम्, M. II. Where roads cross : (1) चतुष्पथम् (of four roads); (2) शृङ्गाटकम् (=1) ; (3) त्रिपथम् (of three roads); (4) तरः (very rare).

CROSS-LEGGED : व्यत्यस्तपादः (दा, दं), and sim. comp. s. *Sitting c.* (i.e. placing the feet on the thighs) वीरासनस्थः (स्था, स्थं).

CROSS-QUESTION : v. To cross-examine.

CROSS-ROAD : i.e. an obscure road : (1) उत्पथः ; (2) उन्मार्गः.

CROSS-ROW : i.e. the alphabet : q.v. : मातृका, M.n.

CROSSWISE : (1) व्यत्यस्तम् (?) ; (2) तिरश्चीनम् : v. Sideways, athwart.

CROSSLY : I. Peevishly : q.v. II. Adversely : प्रतीपम्.

CROTCHET : I. A whim, fancy : q.v. II. In music : *शृणिः.

CROTCHETY : i.e. full of whims : v. Whim, whimsical.

CROUCH : I. To stoop low : q.v. : नमयति (c. of नम्). II. To cringe : q.v. : पादयोः पतति (पत्, c. 1.).

CROUP : I. Of a horse, etc. : जघनभागः, K. II. A disease : काशरोगविशेषः.

CROW (subs.) : I. The bird : (1) काकः ; (2) वायसः. *Carrion c.* : दग्धकाकः (?). II. A bar : लोहदण्डः. III. Of the cock : रवः : v. Cry. Ph. : *at cock-c.* प्रत्यूषे : v. Morning.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CROW (v.) : I. Of the cock : रौति, वि-, (रु c. 2.) : v. To cry. II. To boast : q.v. विकत्थते (कत्थ्, c. 1.).

CROWFOOT : a plant : *काकपादः.

CROWD (subs.) : I. Of people : (1) जनसमूहः, Mr. ; (2) जनसंमर्दः (=men pressed together without order), *a great c.* : महान् जनसंमर्दः, Mr. x. ; (3) सङ्कुलम् (=जनसंमर्दः), D. iv. ; (4) जनौघः, and sim. comp. s II. Populace : q.v. III. Any c. : v. Throng, multitude.

CROWD (v.t.) : I. Lit. : Ph. : *the place was very c. ed* : तत्र महान् जनसंमर्द आसीत् ; *c. ed with cars and horses* : रथाश्वसङ्कुलः (ला, लं), Ki. i. 16., *a. c. ed house* : जनाकीर्णं गृहम् (i.e. full of men), Sa. : *the theatre is c. ed today* : अद्य प्रेक्षकपूर्णा रङ्गशाला (?). II. To urge : q.v

CROWD (v.i.) : expr. as above : v. To flock.

CROWDER : v. Fiddler.

CROWN (subs.) : I. The ornament : (1) किरीट (mn.) ; (2) मुकुटम् ; (3) मौलिः. II. Fig., royal power : *got the c. of Italy* : इतालिराज्यमवाप ; *placed the c. on his son*: तदात्मसम्भवं राज्ये समादधुः, R. xvii. 8. III. Fig., sovereign : q.v. Ph. : *servant of the c.* : राजसेवकः. IV. Any garland : q.v. : माला. V. Of the head : चूडा. VI. Summit : q.v. : चूडा. VII. A coin : इंलण्डीयरूप्यमुद्राविशेषः.

CROWN (v.t.) : I. To invest with royal power : (1) (राज्ये) अभिसिञ्चति (सिच्, c. 6) (according to the Hindu style), R. ; (2) राज्ये समादधति (धा, c. 3.), R. (3) मौलिं ग्राहयति (c. of ग्रह्) (?). II. To adorn : q.v. : भूषयति (भूष्, c. 10.). III. To consummate : q.v. Ph. : *c. ing success* सिद्धेः परा कोटिः (?).

CROWN-JEWELS : राजरत्नानि (n. pl.) (?).

CROWN-PRINCE : युवराजः.

CRUCIAL : perh. मर्ममेदिन् (f. णी) : v. Severe, strict.

CRUCIBLE : (1) मूषः (षी, षं) ; (2) आवर्तनी.

CRUCIFIX : *क्रुशारोपितस्य कृष्टस्य प्रतिमा.

CRUCIFIXION : *क्रुशारोपणम्.

CRUCIFORM : *क्रुशाकारः (रा, रं).

CRUCIFY : I. Lit. : *क्रुशम् आरोपयति (c. of रुह्). II. Fig. : *to c. the flesh* : इन्द्रियाणि जयति.

CRUDE : अपक्व (f. क्वा) (lit. and fig.) : v. Unripe, immature.

CRUDELY : v. Imperfectly.

CRUDENESS, CRUDITY : अपक्वता : v. Unripeness, immaturity.

CRUEL : (1) निष्ठुरः (रा, रं) ; (2) क्रुरः (रा, रं) ; (3) नृशंसः (सा, सं) ; (4) निष्करुणः (णा, णं) (=unmerciful : q.v.) ; (5) कठिनः (ना, नं) (=hard-hearted : q.v.).

CRUELLY : (1) निष्ठुरम् ; (2) क्रुद्धम् ; (3) निष्करुणम् : v. Unmerciful.

CRUELTY : नैष्ठुर्यम् *or* निष्ठुरता ; (2) क्रौर्यम् *or* क्रुरता ; (3) नृशंसता.

CRUET : *कूपकः. *C. -stand* : *कूपकाधारः.

CRUISE (subs.) : I. A jug : q.v. II. Of a ship : v. Voyage.

CRUISE (v.i.) : (समुद्रेण *or* पोतेन) परिभ्रमति (भ्रम्, c. 1.) (?).

CRUISER : *परिभ्रमणपोतः.

CRUMB : I. A morsel : q.v. II. The soft part of bread : मध्यभागः *or* कोमलभागः (?). Ph. : *to a c.* : निरवशेषम्.

CRUMBLE (v.t.) : चूर्णयति (चूर्ण्, c. 10.) : v. To bruise. *To be c.d into dust* : धूलीभवति.

CRUMBLE (v.i.) : I. Lit. : चूर्णीभवति. II. Fig. : विनश्यति (नश्, c. 4.) : v. To perish.

CRUMP : I. Crooked : q.v. : कुब्जः (f. -ब्जा). II. Hard : q.v.

CRUMPLE : v. To rumple, wrinkle.

CRUPPER : पुच्छबन्धः, Williams.

CRUSADE : *क्रुशेदम् ; कृष्टीयानां पुण्यभूमिलाभाय महम्मदीयान् प्रत्यभियोगः.

CRUSH (v.t.) ; (1) मृद्नाति *or* मर्दयति, -ते, आ-, परि-, वि-, सं-, (मृद्, c. 9. *or* 10.), *c. ed the forces of his enemies* : परेषां बलान्यमृद्नात् , R. ; (2) दलति *or* दलयति (दल्, c. 1. and 10.), *c. ing forts* दलयन्दुर्गाणि, K. ; (3) मथ्नाति, प्र-, (मन्थ्, c. 9.), *shall I not c. the hundred Kauravas* : मथ्नामि कौरवशतं न, Ve. : v. To grind, overwhelm, put down.

CRUSH, CRUSHING (subs.) : I. The act :

Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1) मर्दनम्, वि- ; (2) दलनम्. II. Of a crowd : जनसंमर्दः, Mr.

CRUSHING (adj.) : प्रमाथिन् (f. नी), *of c. calamities* : प्रमाथिनीनां विपदाम्, Ki. iii. 34.

CRUSH (v.) : I. Trans. : v. To encrush. II. Intrans : उपरि संहन्ति (हन्, c. 2.) (?).

CRUST (subs.) : कठिनभागः.

CRUSTACEAN, CRUSTACEOUS : *वर्मधरः (री, रं).

CRUSTILY : v. Peevishly, angrily.

CRUSTINESS : I. Hardness : q.v. II. Peevishness : q.v.

CRUSTY : I. Hard : q.v. : कठिनः (ना, नं). II. Peevish, surly : q.v.

CRUTCH : यष्टिः, *leaning on a c.* : यष्ट्यावलम्बितः, Ki. : v. Stick.

CRY (subs.) : I. Of lower animals : रवः *or* विरावः, *very loud cries were also uttered by the elephants* : मुक्तो विरावः सुमहान् कुञ्जरैरपि, Mah. : v. Noise, sound. II. Clamour : उत्क्रोशः *or* आक्रोशः, *by the c.s of the disputants* : विवदमानानां प्रजानामाक्रोशैः, D. : v. Noise. III. Of distress : (1) आर्तनादः, आर्तरवः, and sim. comp.s, *by the piteous cries of the attendants* : परिजनानां करुणस्वनेन, M.n. ; (2) क्रन्दनम् *or* आक्रन्दितम् *or* आक्रन्दः (=loud c. of grief) ; (3) रुदितम् : v. Weeping. IV. Of crier : perh. आक्रोशः : v. Proclamation.

CRY (v.t.) : I. To utter : q.v. II. To proclaim : q.v.

CRY (v.i.) : I. To c. out : q.v. II. To weep : (1) क्रन्दति *or* क्रन्दयति, आ-, (क्रन्द्, c. 1. and 10.), *cried aloud* : मुक्तकण्ठं चक्रन्द, R. xiv. 68 ; (2) रोदिति, प्र-, (रुद्, c. 2.), *cried aloud* : उच्चैररोदीत्, K. ; क्रोशति, वि-, आ-, (क्रुश्, c. 1.) (rare), B. iii. 22. III. To utter sounds : (1) रौति, वि-, (रु, c. 2.), *this vulture is c. ing not once* : नैकशः शकुनिरयं विरौति, Mr. ; (2) वाशति *or* वाश्यते (वाश्, c. 1. and 4.), *this crow is c. ing gratingly* : रुक्षस्वरं वाशति वायसोऽयम्, Mr. : v. Noise, to make.

CRY DOWN : अव-क्रोशति, उप-, अप-, : v. To detract, censure.

CRY OUT : (1) क्रोशति, आ, वि-, उत्, *C.* ; आक्रोश, विक्रोश, लपाधिचण्डम्, Mr. ; (2) शब्दायते (=to call out). *To c. for protection* : शरणं क्रन्दति, V. i.

CRY UP : v. To extol.

CRYING (adj.) : v. Notorious, heinous.

CRYSTAL : I. Subs. : स्फटिकः. II. Adj. : (1) स्फटिक-, *c. palace* : स्फटिकहर्म्यम्, Ku. vi. 42. ; स्फटिकाभः (भा, भं) (=like c.) : v. Transparent.

CRYSTALLINE : v. Crystal (II).

CRYSTALLIZATION : *स्फाटिकीभावः.

CRYSTALLIZE : I. Trans. : *स्फाटिकीकरोति. II. Intrans : *स्फाटिकीभवति (भू, c. 1.).

CUB (subs.) : शावः, -कः : v. Young (subs.).

CUB (v.) : सूते (सू, c. 2.) : v. To bring forth.

CUBE (subs.) : I. In arith. : घनः, *c. root* : घनमूलम्, Li. II. In geo. : समकोणसमचतुर्भुजघनक्षेत्रम्, K.d.

CUBIC, CUBICAL : expr. by comp., *c. hand* : घनहस्तः, Li. ; *c. equation* *घनसमीकरणम्.

CUBIT : (1) हस्तः, *five c.s in length* : पञ्चहस्तदीर्घ (f. र्घा) ; (2) किष्कुः, D.

CUCKOLD : expr. by circumlo, *he is a c.* : तस्य भार्या पुंश्चली *or* बन्धकी.

CUCKOO : (1) कोकिलः ; (2) पिकः ; (3) परभृतः.

CUCUMBER : I. The plant : त्रपुषी. II. fruit : त्रपुषम्.

CUD : I. Lit. : पशुविशेषैः पुनश्चर्वणाय मुखनीतं भुक्तम्. Ph. : *to chew the c.* : रोमन्थमभ्यस्यति, Sa. ii. ; *chewing the c.* : रोमन्थः. II. Where it is chewed : perh. रोमन्थभागः.

CUDGEL (subs.) : (1) लगुडः ; (2) यष्टिः ; (3) दण्डः.

CUDGEL (v.) : लगुडेन *or* यष्ट्या प्रहरति (हृ, c. 1.) *or* ताडयति (तड्, c. 1.) *or* आहन्ति (हन्, c. 2.).

CUDGELLING (subs.) : (1) यष्ट्याघातः ; (2) लगुडप्रहारः, *giving (them) a very good c.* : लगुडप्रहारैर्जर्जरीकृत्य, P. i. 22.

CUE : I. The end of a thing : अन्तः : v. End. II. A hint : q.v. : संज्ञा, *to give a c.* : संज्ञां ददाति, Mr. III. Humour, disposition : q.v. IV. For billiards : *दीर्घदण्डः *or* दण्डः.

CUFF (v.t.) : करतलेन *or* तलेन *or* चपेटेन ताडयति (तड्, c. 10.), आहन्ति (हन्, c. 2.), *or* प्रहरति (हृ, c. 1.), *c. ed him on the breast* : तलेनोरस्यताडयत्, V.p.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CUFF (subs.) : I. A blow, slap : q.v. : तलप्रहारः. Ph. : *to be at fisti -c. s* : मुष्टीमुष्टि युध्यते. II. Of a sleeve : *कफम्.

CUIRASS : (1) कवच (mn.) ; (2) वर्मन् (n.) ; (3) वारवाणः ; (4) कङ्कटः, -कः ; (5) तनुत्रम् ; (6) उरश्छदः ; (7) दंशनम् (rare).

CUIRASSIER : (1) कवचिन् (f. नी) ; (2) वर्मितः (ता, तं) ; (3) व्यूढकङ्कटः (टा, टं), and sim. comp.s.

CULINARY : पाक- in comp., *c. utensil* : पाकपात्रम् ; *the c. art* : पाककला.

CULL : आहरति (हृ, c. 1.) : v. To pluck, gather.

CULM : स्तम्बः : v. Stalk.

CULMINATE : I. Lit. : *the sun has c.d* : मध्यमलङ्करोति भानुः, K. II. Fig. : परां कोटिम् अधिगच्छति (गम्, c. 1.), K.

CULMINATING (adj.) : Ph. : *c. point* : परा कोटिः ; परा काष्ठा.

CULPABILITY : (1) सदोषता ; (2) सापराधता ; (3) निन्दार्हता (=blamableness).

CULPABLE : (1) सदोषः (षा, षं) ; (2) सापराधः (धा, धं) ; (3) निन्दार्हः (f. र्हा) (=blamable: q.v.). *C. homicide* : ज्ञानकृता नृहत्या (?).

CULPRIT : I. An accused person : अभियुक्तः (क्ता, क्तं). II. A criminal : q.v.

CULTIVATE : I. To till : (1) क्षेत्रं करोति, *to have land c.d* : क्षेत्रं कारयति, Y. ; (2) कर्षति (कृष्, c. 1.) (=to plough). II. To devote, to foster : (1) शीलयति, अनु-, (शील्, c. 10.), *sages c. good conduct* : शीलयन्ति मुनयः सुशीलताम्, Ki. ; (2) उपचिनोति, प्र-, (चि, c. 5.), *c. friendship* : प्रचिनु मैत्रीम्, Vi. iii. ; (3) सेवते, नि-, (सेव्, c. 1.) : v. To devote. III. To civilize : q.v.

CULTIVATION : I. Tillage : (1) कर्षणम् ; (2) कृष्टिः (rare). II. Fostering care : अनुशीलनम्. III. Culture : q.v.

CULTIVATOR : क्षेत्रिकः : v. Husbandman.

CULTURE : I. v. Cultivation. II. Refinement : q.v. : शिक्षा.

CULVERT : *आवृतनाली.

CUMBER : v. To encumber., embarrass.

CUMBERSOME, CUMBROUS : I. Burdensome : q.v. : (1) भारिन् (f. णी) ; (2) दुर्भरः (रा, रं). II. Vexatious : q.v.

CUMBRANCE : v. Encumbrance.

CUMBROUSNESS : भारिता : v. Cumbrous.

CUMMIN : (1) जीरः ; (2) जीरकः.

CUMULATIVE : (1) उपचयिन् (f. नी) (?) ; (2) निचयिन् (f. नी) (?).

CUNEIFORM : कीलाकारः (रा, रं). "*C. scholar*" *कीलवर्णविद् (mfn.).

CUNNING (adj.) : I. Skilful : q.v. II. Artful : (1) चतुरः (रा, रं) (best equiv.) ; (2) विदग्ध (f. ग्धा) ; (3) छलनापरः (रा, रं) (=wily).

CUNNING (subs.) : I. Skill, dexterity : q.v. II. Art, deceit : (1) चातुर्यम् ; (2) चातुरी ; (3) वैदग्ध्यम् ; (4) छलम् (=stratagem).

CUNNINGLY : (1) चातुर्येण ; (2) छलेन.

CUP (subs.) : I. Lit. : (1) पानपात्रम् ; (2) पानभाजनम् ; (3) चषक (mn.). II. Drinking : q.v. : "*fond of the c.*" पानप्रियः (या, यं). III. Lot, portion : q.v. Ph. "*to taste of the sorrow's c.*" दुःखं रसयति. IV. A flower -c. : पुष्पकोषः. *A c. made of leaves* : पत्रपुटः, R.

CUP (v.) : रक्तं स्रावयति (c. of स्रु) *or* मोक्षयति (मोक्ष्, c. 10.).

CUP-BEARER : पानपात्रवाहिन् (m.) (?) ; चषकवाहकः (?).

CUPBOARD : अन्नकोष्ठः (?).

CUPID : (1) कामः ; (2) कन्दर्पः ; (3) मदनः ; (4) मन्मथः.

CUPIDITY : I. Covetousness : q.v. : लोभः. II. Lust : q.v.

CUPOLA : तोरणशीर्षम् *or* तोरणशृङ्गम् (?).

CUPPING-GLASS : शरारीमुखम् (a kind of c.), Sr.

CUR : शुनकः : v. Dog.

CURABLE : (1) चिकित्स्य (f. स्या) ; (2) साध्य (f. ध्या), *easily c.* : सुखसाध्य (f. ध्या) Sr. ; (3) प्रतीकार्य (f. र्या).

CURACY : *आचार्यकपदम्.

CURATE : *आचार्यकः.

CURATIVE : (1) रोगघ्न (f. घ्नी) ; (2) रोगहरः (री, रं).

CURATOR : अध्यक्षः (?).

CURB (subs.) : I. For a horse : अश्वमुखशृङ्खला (?) : v. Bit. II. Fig. : v. Check, restraint.

CURB (v.) : नियन्त्रयति (यन्त्र्, c. 10.), *whose*

Gurukul Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

mouth is not c.ed : अनियन्त्रितमुखः, D. : v. To restrain.

CURB-STONE : निरोधोपलः, and sim. comp.s (?).

CURD : दधि (n.), *skim of c.s* : दध्नः सरः, Sr.

CURDLE (v.) : I. Trans : घनीकरोति (कृ, c. 8.). II. Intrans : घनीभवति (भू, c. 1.).

CURE (subs.) : I. Curacy : q.v. II. Of diseases : (1) शान्तिः ; (2) उपशमः ; (3) सिद्धिः ; (4) प्रतीकारः : v. Treatment (II).

CURE (v.t.) : I. Of diseases : (1) चिकित्सति (कित्, c. 1.) (gen. = to treat), *not a sick man returned without his disease c.d* : नाचिकित्सितगदेन रोगिणा प्रत्यगामि, Si. xiv. 49. ; (2) शमयति, प्र-, उप-, (c. of शम्), *for c. ing diseases* : रोगोपशमार्थम्, Sr. ; (3) साधयति (c. of सिध्) (*such*), *ulcers get c.d with difficulty* : व्रणाः कृच्छ्रेण सिध्यन्ति, Sr. ; (4) प्रतिकरोति, Sr. II. Of persons : (1) by the above verbs with the gen. of the person c.d, *I will c. the child* : बालस्य रोगं साधयामि ; (2) सुस्थं (f. स्थां), नीरोगं (f. गां) करोति with abl. of the disease. III. To preserve : लवणयति (nomi.) (?).

CURFEW-BELL : प्रदोषघण्टा, and sim. comp.s.

CURIOSITY : I. Inquisitiveness : (1) कुतूहलम् *or* कौतूहलम्, *satisfy your c.* : पूरयतु कुतूहलम्, U. iv. ; *excited his excessive c.* : अतुलं विदधे कुतूहलम्, N. ii. 7. ; *from c.* : कुतूहलवशात्, K. ; (2) कौतुकम्, *since seeing you I have very great c. about it.* : अतिमहत् खलु भवद्दर्शनात् प्रभृति मे कौतुकमस्मिन् विषये, K. (note the loc.) ; (3) दिदृक्षा (c. to see), *my heart filled with c.* : दिदृक्षाक्रान्तहृदयः, D. ; (4) शुश्रूषा *or* श्रोतुमिच्छा (c. to hear), Ki. II. An object of c. : कुतूहलम् *or* कौतूहलम् *or* कौतुकम् (rare), *by telling about many c.s seen by travel* : पर्यटनदृष्टानेककौतूहलप्रकथनेन. P. iii. 2. ; (2) अपूर्ववस्तु (n.) *or* अपूर्वदृश्यम्.

CURIOUS : I. Inquisitive : (1) कुतूहलिन् (f. नी), *c. to see* : दर्शनकुतूहलिन् (f. नी) K. ; (2) कुतूहलाक्रान्तमनस् (mfn.) ; (3) कौतुकाविष्टचेतस् (mfn.) ; (4) दिदृक्षु (mfn.) (=c. to see) ; (5) शुश्रूषु (mfn.) (=c. to hear) (rare) ; (6) जिज्ञासु (mfn.) (=c. to know). II. Singular, wonderful : (1) कुतूहलः (ला, लं) (rare) ; (2) अपूर्वः (र्वा, र्वं). III. Nice, scrupulous : q.v. IV. Careful, studious : q.v.

CURIOUSLY : I. Inquisitively : सकौतुकम्. II. Carefully : q.v. III. Wonderfully : q.v.

CURL (subs.) : I. Of hair : (1) अलकः ; (2) चूर्णकुन्तलः. II. Any undulation : भङ्गिः.

CURL (v.t.) : I. To crisp : मञ्जरीकरोति (?) : v. Curly. II. To coil : q.v. : मण्डलीकरोति, *c. ing up the trunk* : मण्डलितहस्तकाण्डः, D. III. To ripple : q.v.

CURL (v.i.) : expr. by adj. : v. Curled.

CURLED, CURLY : (1) कुटिलः (ला, लं), Mah. ; (2) मञ्जुरः (रा, रं), D. vi. ; (3) अरालः (ला, लं), *c. haired* : अरालकेशः (शी, शं), N. xiii. 40. ; (4) कुञ्चितः (ता, तं), *c. -haired* : कुञ्चितकेशः (शी, शं), H.s.

CURLEW : a. bird : क्रौञ्चः (?).

CURLINESS : (1) कुटिलता ; (2) मञ्जुरता ; (3) अरालता.

CURLING-IRON : *अलकलौहम्.

CURMUDGEON : v. Miser.

CURRANT : I. The tree : *करण्टः. II. Its fruit : करण्टम् *or* करण्टफलम्. III. A kind of dried grape : perh. शुष्कद्राक्षा.

CURRENCY : I. Circulation : q.v. Ph. : *to gain c.* (i.e. to be current) प्रचलितः (ता, तं) भवति. II. Estimation : q.v. III. The current coin : प्रचलित मुद्रा (?), *we have a paper c. here* : *अत्र कागजमुद्रा प्रचलिता.

CURRENT (adj.) : (1) प्रचलितः (ता, तं) ; (2) प्रचलः (ला, लं). Ph. : *c. year* : वर्तमानवत्सरः ; *c. report* : जनप्रवादः.

CURRENT (subs.) : I. Lit. : (1) स्रोतस् (n.) (of water), *against the c.* : प्रतिस्रोतस् ; (2) प्रवाहः, *c. of electricity* : *विद्युत्प्रवाहः ; (3) रयः *or* वेगः (speed) (when the sense is clear), *the c. of river is its cause* : नदीवेगस्तत्र कारणम्, Sa. II. Fig. : *c. of time* : कालगतिः (?) ; *the c. of opinion is in your favour* : *तवानुकूलं साधारणानां मतम्.

CURRENTLY : v. Generally, commonly.

CURRICLE : रथः (?) : v. Chariot.

CURRIER : *चर्मशोधकः.

CURRISH : I. Churlish, quarrelsome : q.v. II. Brutal : q.v.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CURRY (subs.) : व्यञ्जनम् (applied to all c.s), N. xvi.

CURRY (v.t.) : I. To dress leather : शोधयति (c. of शुध्) (?). II. To beat, drub : q.v. Ph. : *to c. a horse* : अश्वदेहं मार्ष्टि (मृज्, c. 2.) ; *to c. favour with the people* : लोकानाराधयति, U.i.

CURRY-COMB : *अश्वदेहमार्जनी.

CURSE (v.) शपति, -ते, अभि-, (शप्, c. 1.), *c.d him "become a moral"*: तमशपत् एहि मर्त्यत्वमिति, D. iii.; *Krishna gave no reply when the Chedi king was c. ing*: प्रतिवाचमदत्त केशवः शपमानाय न चेदि भूभुजे, Si. xvi. 25. Ph. : *I will c. and reduce your father to ashes* : शापं दत्त्वा पितरं ते भस्मसात् करिष्यामि, P. i. 5.

CURSE (subs.) : I. Lit. : शापः, अभिशापः. II. Bane, pest : q.v. : *c. of the nation* : कुलाङ्गारः.

CURSED (adj.) : expr. by -हत *or* -हतक affixed *or* दग्ध prefixed, *c. son of Madri*: माद्रीसुतहतकः, Ve. : v. Accursed.

CURSORILY : क्षिप्रम् : v. Hastily, slightly, summarily.

CURSORY : क्षिप्रः (प्रा, प्रं) : v. Superficial, slight, hasty.

CURST (adj.) : संक्षिप्तः (प्ता, प्तं) : v. Peevish, malignant.

CURT (adj.) : संक्षिप्तः (प्ता, प्तं) : v. Brief, concise.

CURTNESS : संक्षेपः (पा, पं) : v. Conciseness.

CURTAIL (v.) : v. To diminish, shorten.

CURTAIN : (1) तिरस्करिणी ; (2) जवनिका ; (3) मशहरी (mosquito -c.). Ph. : *the c. falls*: जवनिका पतति (?) ; the c. rises : जवनिका उत्पतति (?) ; *behind the c.*, (a) in theatrical language नेपथ्ये (loc.), (b) in gen. sense परोक्षे.

CURTAINED : अवगुण्ठितः (ता, तं) : v. To veil.

CURTAIN-LECTURE : *शय्यानुशासनम्.

CURTLY : संक्षेपेण : v. Briefly, concisely.

CURULE : Ph. : *c. chair* : सिंहासनम् (?).

CURVATURE : वक्रिमन् (m.) (?).

CURVE (v.) : वक्रीकरोति : v. To bend.

CURVE (subs.) : I. A bending : q.v. II. A c. line : *वक्ररेखा.

CURVED : (1) वक्रः (क्रा, क्रं) ; (2) जिह्मितः (ता, तं) : v. Crooked.

CURVET (v.) : v. To leap, bound, frisk.

CURVET (subs.) : I. Of horses : वल्गितम्. II. A prank, frolic : q.v.

CURVILINEAR : *वक्ररेखामयः (या, यं).

CUSHION : (1) उपधानम् ; (2) उपबर्हः.

CUSHIONY : v. Soft, pliable.

CUSP : चूडा : v. Also point.

CUSTARD : *दुग्धाण्डमिष्टम्.

CUSTARD-APPLE : I. The tree : आतृप्यः. II. The fruit : आतृप्यम् *or* -फलम्.

CUSTODIAN : रक्षकः : v. Keeper, superintendent.

CUSTODY : I. Charge, guarding : q.v. रक्षा. II. Confinement : q.v. : निरोधः.

CUSTOM : I. Usage : आचारः, *immemorial c.* : शाश्वत आचारः, M. ; *deviating from c.* : आचाराद्विच्युतः, M. II. Business : q.v. Ph. : *he has a great deal of c.* : तस्यानेका ग्राहकाः. III. A c. duty : शुल्क (mn.).

CUSTOM-HOUSE : शुल्कशाला. *C. officer* : शुल्काधिकृतः; शुल्कोपजीवी, Mah.

CUSTOMARY : (1) आचार in comp., *c. taking of smoke* : आचारधूमग्रहणम्, K. Ph. : *it is c.* : एष आचारः ; (2) नित्यः (त्या, त्यं) (what should be observed daily), B.

CUSTOMER : ग्राहकः, *a known c.* : परिचितग्राहकः, P. i. 1. : v. Buyer.

CUT (subs.) : I. A wound : (1) छिन्नम्, Sr. ; (2) क्षतम् (=hurt, wound : q.v.) II. A blow : (1) प्रहारः ; (2) आघातः. III. Portion cut off : छेदः. IV. A slight. Ph. : *this was an unkind cut* : *एष परिहारो निर्दय आसीत्. V. A groove : q.v. : खातम्. VI. An engraving : q.v. VII. Shape : आकारः. VIII. Of cards: *विभागः. Ph. : *whose c. is it*: *कस्य विभागावसरः. IX. A horse : अश्वः. Ph. : *a short c.* : सरलमार्गः.

CUT (v.t.) : I. Lit. : (1) छिनत्ति (छिद्, c. 5.) (best equiv.), *to c. the Śami tree* : शमीलतां छेत्तुम्, Sa. ; *to c. nails* : नखानि छिनत्ति, M. iv. 69. ; *c. ing the heart* : मर्मच्छिद् (mfn.), Ki. xi. 49. ; (2) लुनाति (लू, c. 9.), *with hair c.* : लूनकेशः, K. b. ; *c. ting of corn* : व्रीहिलवनम्, S. c. ; (3) कृन्तति (कृत्, c. 6.) नि-, *to cut one's own throat* : स्वस्य कण्ठं निकृन्तति, Mah. ; (4) वृश्चति (व्रश्च,

Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

c. 1.) (rare), *c. one another* : परस्परं वव्रश्चुः, B. ; (5) द्यति (दो, c. 4.) (rare). Ph. : *the dart was c. into three pieces*: त्रिधा कृता शक्तिः, Ve. iv. II. To carve : q.v. III. To intersect : q.v. IV. To castrate : q.v. Ph. : (1) *to c. cards* : *तासं कृन्तति ; (2) *to c. a figure*: प्रतिष्ठां प्राप्नोति ; (3) *to c. a person*: परिहरति ; (4) *to c. capers* : उपहासं करोति ; (5) *to c. the teeth*. V. To put forth ; (6) *c. -glass* : *संस्कृतकाचः.

CUT (v.i.) : I. Lit. : v. Above. II. To interfere (as a horse) : q.v.

CUT DOWN : I. To fell : छित्वा *or* लूत्वा *or* कर्तित्वा पातयति (c. of पत्) ; अवकृन्तति ; अवद्यति, Ki. II. To abash : q.v. : ह्रेपयति (c. of ह्री). III. To reduce, diminish : q.v.

CUT IN *or* INTO : i.e. to interrupt : q.v. विच्छिनत्ति.

CUT OFF : I. Lit. : (1) छिनत्ति, (*their*) *heads were c. off* : मूर्धानौ चिच्छिदाते, Vi. vi. ; (2) कृन्तति, नि-, *c. off his arms* : भुजौ चकृततुस्तस्य, B. vi. 45. ; (3) लुनाति, *c. ting off the head of this boy* : एतस्य शिशोः शिरो लूत्वा, Vi. iii. II. To destroy : q.v. : *to be c. off by disease* : रोगेण क्षयं गच्छति, एति. III. To interrupt : नि-रुणद्धि (रुध्, c. 5.), *c. off supplies* : वीवधं निरुणद्धि, Si. ii. 64.

CUT OUT : I. Lit. : उत्कृन्तति. II. To contrive, adapt : q.v. III. To supersede : q.v. : उच्छिनत्ति. IV. To carry off : q.v.

CUT SHORT : I. To abridge : संक्षिपति (क्षिप्, c. 6.). Ph. : *to c. the matter short* : किं बहुना. II. To interrupt : Ph. : *c. ing him short* : अस्य वचनम् आक्षिप्य (क्षिप्, c. 6.), K.

CUT TO *or* IN PIECES : (1) खण्डखण्डं करोति ; (2) खण्डशः *or* लवशः *or* सहस्रशः etc. छिनत्ति, कृन्तति, etc. ; (3) शकलयति, वि-, (nomi.), Vi.

CUT UNDER : v. To undersell.

CUT UP : I. To cut to pieces : q.v. : निकृन्तति, *which c.s. up enemies' army* : परसेनानिकर्तनम्, Mah. II. Fig. : to wound, assail : (1) गुरुभिर्दोषैर्मर्मसु निस्तुदति (तुद्, c. 6.). Ki. xvii. 43. ; (2) खण्डयति (खण्ड्, c. 10.), B.

CUTANEOUS : expr. by comp., *c. disease*: त्वग्रोगः ; *c. eruption*: दद्रुः.

CUTICLE : अवभासिनी, Wilson : v. Skin.

CUTLASS : कर्तरिका : v. Sword.

CUTLER : *छुरिकाकारः.

CUTLERY : I. The business of a cutler : छुरिकाकारव्यवसायः. II. Cutting instruments : *छुरिकादीनि (n. pl.).

CUTLET : *भृष्टफालिका, *veal c.* : *भृष्टा वत्समांसफालिका.

CUTPURSE : ग्रन्थिभेदः, -कः, M. ix. 277 ; v. Thief.

CUTTER : I. One who cuts : (1) छेदकः ; (2) छेत्तृ (m.) ; (3) छिद् in comp., *wood -c*: वनछिद् ; (4) लवनकर्तृ (m.), *rice -c.* : धान्यलवनकर्ता, K. b. II. A cutting instrument : कर्तरिका. III. A front teeth : v. Incisor. IV. A small ship : perh. मद्गुः.

CUT-THROAT : I. Subs. : कण्ठच्छेदकः : v. Murderer. II. Adj. : v. Murderous.

CUTTING (adj.) : I. Lit. : (1) छित्वरः (री, रं) ; (2) व्रश्चनः (ना, नं). II. Of wind or cold : perh. उद्वेगकारिन् (f. णी). III. Biting, severe : q.v. : मर्मच्छिद् (mfn.).

CUTTING (subs.) : I. The act : (1) छेदः, -नं (best equiv.) ; (2) कर्तनम् *or* कृन्तनम्, नि- ; (3) लवनम् ; (4) व्रश्चनम् ; (5) छिदा. II. A part cut off : छेदः : v. Part. III. A trench : q.v. : खातम्.

CUTTLE-FISH : a mollusk : *दशभुजा.

CUT-WATER : पोताग्रम् ; *तरङ्गभेदिन् (n.).

CYCLE : चक्रम्, *c. of time* : कालचक्रम्, Sr. : v. Circle.

CYCLONE : चक्रवात्या (?) : v. Hurricane.

CYCLOPAEDIA : *विद्याकोषः, *c. of medicine* : *वैद्यकविद्याकोषः.

CYGNET : हंसशावकः, बालहंसः.

CYLINDER : *स्तूपः ; यष्टिघनक्षेत्रम्, K.d.

CYLINDRICAL : *स्तूपाकारः (रा, रं).

CYMBAL : (1) तालम् ; (2) झल्लकम्, (3) घनम् ; (4) झिल्लिः.

CYNIC (subs.) : मनुष्यद्वेषिन् (m.) (?).

CYNIC, -AL (adj.) : v. Surly, austere, captious.

CYNICISM : मनुष्यद्वेषिता (?) ; विषयपराङ्मुखता (in good sense).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

SHOW (v.) : (1) दर्शयति, प्र-, नि-, अभि-, परि-, सं-, उप- (c. of दृश्), *s.ed him to Indumati* : निदर्शयामास (तम्) इन्दुमत्यै, R. vi. 31. ; *s.ing affection by the mere shedding of useless tears* : निष्फलेन अश्रुपातमात्रेण स्नेहमुपदर्शयन्, K. ; *O, merciless fate, s. mercy (on me)* : अयि दैव निर्घृण दर्शय दयाम्, K. ; *s.ing (his) teeth* : दन्तानि दर्शयन्, V. p. v. 28. 16. ; *the Veda also s.s the unity of science* : दर्शयति वेदोऽपि विद्यैकत्वम्, Si. iii. 3. 4. ; *he always s.s as if his dependents were beloved friends* : सखीनिव प्रीतियुजोऽनुजीविनः स सन्ततं दर्शयते, Ki. i. 10. ; (2) उपदिशति (दिश्, c. 6.=to advise, inform : q.v.), *who will s. the way to the Golden town* : यः सुवर्णपुरगामिनं पन्थानमुपदेक्ष्यति, K. ; (3) कथयति (=to speak : q.v.), *it shews the excellences of the king that*····· : अनेन कथिता राज्ञो गुणा यत्·····, R. x. 53. ; (4) दर्शनं ददाति (दा, c. 3.=s. one's self), *ashamed of wantonness, shame itself did not s. to the prince* : कुमारस्य न ददाति तरलतालज्जिता लज्जैव दर्शनम्, K. ii. ; (5) प्रतिपादयति (=to establish : q.v.). Comp. (a) *s. forth* : दर्शयति : v. To reveal, manifest ; (b) *s. off* : प्रदर्शयति, सं- ; (c) *s. up* : अभि-दर्शयति : v. To expose, disclose.

SHOW (subs.) : I. Look : q.v. : (1) दर्शनम् ; (2) by verb. II. Appearance, semblance : (1) आभासः ; (2) by verb : भाति, प्रति- (भा, c. 2.) *or* भासते, अव-, (भास्, c. 1.). III. A spectacle : (1) दृश्यम् ; (2) रङ्गः (for amusement) ; (3) यात्रा (=procession, theatrical s.). IV. Pretence : q.v. : व्यपदेशः. V. Display, pomp : आडम्बरः.

SHOWER (subs.) : I. Of rain : वृष्टिः, *heavy s. of hail* : तुमुलकरकावृष्टिः, Me. i. 55. : v. Rain. II. Fig. : (1) वृष्टिः *or* वर्षः, *sent a s. of stones* : अश्मनां वृष्टिं ससर्ज, Ki. xvii. 60. ; *s. of arrows* : इषुवर्षः, Si. xx. 18. ; (2) धारा (=flow, as of tears) : (3) जालम् (=thicket, as of arrows). III. One who shows : दर्शकः, प्र-, etc., Mr. iv. 20.

SHOWER (v.) : वर्षति, प्र-, अभि- (वृष्, c. 1.), *s.s on them who always flatter* : तत्र वर्षन्ति योऽहर्निशं स्तौति, K. ; *s.ing much wealth on the bards* : वसूनि वर्षन् सुबहूनि वन्दिनाम्, N. xv. 1. (the loc. is the proper cons.) : v. Also to rain.

SHOWER-BATH : I. The place : धारागृहम् *or* यन्त्र- (?), R. xvi. 49. II. The act : धारास्नानम and sim. comp.s (?).

SHOWERY : वर्षुक (f. का) ; v. Rainy.

SHOWMAN : (1) दर्शयितृ (f. त्री), प्र- ; (2) by verb.

SHOWY : दृष्टिहारिन् (f. णी) : v. Also gaudy, ostentatious.

SHRED : I. Subs. : खण्ड (mn.) : v. Piece. II. Verb : (1) खण्डीकरोति ; (2) खण्डयति (nomi.).

SHREW (subs.) : I. Of persons : वामशीला स्त्री and sim. comp.s. II. S.-mouse : (1) छुछुन्दरी ; (2) गन्धमूष (f. षी) ; (4) विचक्षण (f. णा) : v. Artful, cunning.

SHREWDLY : (1) चतुरम् ; (2) विदग्धम् ; (3) चातुर्येण, etc.

SHREWDNESS : (1) चातुर्यम् ; (2) चतुरता ; (3) चातुरी ; (4) वैदग्ध्यम् ; (5) विदग्धता : v. Also skill.

SHREWISH : कर्कश (f. शा) : v. Harsh, peevish.

SHRIEK : I. Subs. : (1) क्रन्दितम् : v. Cry ; (2) चीत्कारः : v. Scream. II. Verb : (1) आ-क्रन्दति (क्रन्द्, c. 1.) : v. To cry ; (2) चीत्करोति : v. To scream.

SHRIFT : प्रतिपत्तिः : v. Confession.

SHRIKE : a bird : (1) कलिङ्गः ; (2) पिङ्गः ; (3) घूम्या(म्रा)टः.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SHRILL : (1) कर्कश (f. शा) : v. Harsh ; (2) तीव्र (f. व्रा) : v. Sharp.

SHRILLNESS : (1) कर्कशता : v. Harshness ; (2) तीव्रता : v. Sharpness.

SHRILLY : (1) कर्कशम् : v. Harshly ; (2) तीव्रम् : v. Sharply.

SHRIMP : इञ्छाणः.

SHRINE : देवालयः : v. Temple.

SHRINK (v.i.) : संकुचति (कुच्, c. 6.), *the lotus s.s* : संकुचति पद्मम्, V.d. 7. : v. To contract.

SHRINK (v.t.) : संकोचति (कुच्, c. 1.) : v. To contract.

SHRINK, -ING (subs.) : संकोचः : v. Contraction.

SHRINKINGLY : (1) संकुच्य ; (2) ससंकोचम् : v. Also timidly.

SHRIVEL : (1) संकुचति (intrans.) *or* संकोचति (trans.) ; (2) by adj. : वलिपरीत (f. ता), and sim. comp.s. : v. Wrinkled.

SHROUD (v.) : अवगुण्ठयति (गुण्ठ्, c. 10.) : v. To cover, veil.

SHROUD (subs.) : I. Cover : q.v. : आच्छादनम्, *s.ed the dead body of Bāli* : वाससाच्छादयामास वालिनं नष्टजीवितम्, Ram. iv. 24. 23. II. रज्ज्वः (f. pl.).

SHRUB : I. A tree : गुल्मः. II. A drink : आसवभेदः.

SHRUBBERY : perh. गुल्मवाटिका after वृक्षवाटिका.

SHRUBBY : (1) गुल्मावृत (f. ता) ; (2) गुल्माकीर्ण (f. र्णा) ; and sim. comp.s.

SHRUG : I. Verb : (1) धूनोति (धू, c. 5.=to shake) ; (2) संकोचति (कुच्, c. 1. : ?). II. Subs. : (1) स्कन्धधूननम् (=shaking) ; (2) स्कन्धसंकोचः (=contraction).

SHUCK : कञ्चुकः : v. Shell.

SHUDDER : I. Verb : वेपते, प्र-, (वेप्, c. 1.) : v. To tremble, quake. II. Subs. : वेपथुः : v. Tremor.

SHUDDERINGLY : expr. by adj. : सञ्जातवेपथु, सवेपथु (mfn.), and sim. comp.s.

SHUFFLE (v.t.) : I. Of cards : perh. भञ्जयति (c. of भञ्ज् : comp. भाँजा). II. To confuse, mix up : q.v. : सङ्कुलीकरोति.

SHUFFLE (v.i.) : I. Of cards : *तासं भञ्जयति. II. To dissemble : q.v. : निह्नुते (ह्नु, c. 2.). II. To play tricks : छलयति (nomi with acc.), *s.ing* : छलप्रिय (f. या).

SHUFFLE,-ING (subs.) : I. Of cards : *तासभञ्जनम्. II. Confusion. : q.v. : संकुलीकरणम्. III. Evasion, trick : q.v. : छलम्.

SHUFFLER : (1) निह्नोतृ (f. त्री) : v. Dissembler ; (2) वञ्चक (f. ञ्चिका) : v. Cheat.

SHUN : (1) परिहरति (हृ, c. 1.) : v. To avoid ; (2) वर्जयति, परि-, सं-, (वृज्, c. 10.), *shall s. joking with women* : स्त्रीभिः परिहासं वर्जयेत्, Sr. : v. To leave ; (3) न उपसर्पति (सृप्, c. 1.). etc. (=not to approach), "विनीतं पातकिनमिव नोपसर्पति", K.

SHUT : (1) अपिदधाति *or* -धत्ते (धा, c. 3.), (*by covering*) *who can s. the doors of fate* : को नाम द्वाराणि दैवस्य पिधातुमीष्टे, U. vii. 4. ; *s.-ting the ears* : कर्णौ पिधाय, Mu. i. ; (2) आ-वृणोति, सं-, समा-, परा- (वृ, c. 5.=पिदधाति), *here is a house with the back door not s.* : एतदपरावृतपक्षद्वारकं गेहम्, Mr. ii. ; *to s. the mouth* : मुखं संवृणोति, K. ; (3) ददाति *or* दत्ते (दा, c. 3. : only of *doors* by putting bolts etc.), *s. the gates quick* : दत्त द्वाराणि तूर्णम्, Vi. vi. 16. ; (4) मीलति *or* मीलयति, नि- (मील्, c. 1. and its c. : of the eyes), *the lion of kings s. his eyes never to open again* : अपुनरुन्मीलनाय निमिमील लोचने राजकुलसिंहः, C. v. ; (5) सं-वनते (वन्, c. 1. : rare), Ki. xviii. 2. Ph. : *to s. one's eyes to anything* : न पश्यति, K. ; *with the eyes s.* : मुकुलितनेत्र (f. त्रा), Si. xi. 10.

SHUT IN : I. To confine : q.v. : निरुणद्धि (रुध, c. 7.). II. To cover the view of : समावृणोति (वृ, c. 5.).

SHUT OUT : निवारयति (वृ, c. 10.) : v. To prevent, enclose.

SHUT OUT : I. In gen. : नि-रुणद्धि, सं-, अव-, *thus s. in a cage* : तथा पञ्जरे संरुद्धः, K. ii. : v. To confine, block up, close. II. To terminate : निवर्तते (वृत्, c. 1.). III. To cause to be silent : prob. : मुखं बध्नाति (बन्ध्, c. 9. : with gen.).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SHUTTER : in pl., of windows etc. : *आवरणम् *or* आवृतिः.

SHUTTLE : (1) त्र(त)सरः ; (2) सूत्रवेष्टः, -नम् ; (3) मल्लिकः ; (4) वेमन्, Mah. i. 13. 140.

SHUTTLE-COCK : *पत्रगोलः.

SHY : I. Adj. : (1) लज्जालु (mfn.) : v. Bashful ; (2) शालीन (f. ना) : v. Modest ; (3) कातर (f. रा) : v. Timid. II. Verb : (1) बिभेति (भी, c. 3.), *if (a horse) s.ies strike it on the neck*: ग्रीवायां भीतमाहन्यात्, M.n. on Si. v. 10.

SHYNESS : (1) लज्जालुता ; (2) शालीनता ; (3) कातर्यम् : v. Shy (adj.).

SIB : सनाभि (mfn.) : v. Relative.

SIBILANT : I. Of letters : उष्मः, -वर्णः. II. Hissing : q.v.

SIBYL : (1) सिद्धा ; (2) सिद्धस्त्री ; (3) योगिनी (?).

SICK : I. Inclined to vomit : (1) विवमिषु (mfn.) ; (2) छर्द्यार्त (f. र्ता) ; and sim. comp.s. *To be s.* : वमति (वम्, c. 1.) : v. To vomit ; *to make (one) s.* : वामयति (c. of वम्), Sr. II. To be disgusted at : expr. with विरक्त (f. क्ता), वितृष्ण (f. ष्णा), वीतस्पृह (f. हा) ; and sim. comp.s., *being s. of the world* : उदीर्णवैराग्य (f. ग्या), D. ii. III. Diseased, ill : q.v. : (1) पीडित (f. ता) ; (2) व्याधित (f. ता) ; (3) रुजार्त (f. र्ता) ; (4) रोगिन् (f. णी) ; and sim. deriv.s. IV. Of mind : (1) पीडित (f. ता) ; (2) व्यथित (f. ता) ; (3) उपतप्त (f. प्ता).

SICK-BED : रोगिशय्या and sim. comp.s. Ph. : *on or from s.* : better expr. by शय्यागत (f. ता) with a qualifying word : v. Sick (II.)

SICKEN : I. To disgust : विरक्तिं *or* वैतृष्णं जनयति (c. of जन्). II. To fall sick : रोगेण *or* व्याधिना अभिभूयते (pass. of भू), क्लिश्यते (pass. of क्लिश्), etc. : v. Also sick. III. To languish : q.v.

SICKLE : (1) दात्रम् ; (2) लवित्रम्.

SICKLINESS : (1) रुग्णता ; (2) रोगाकुलता, etc. : v. Sickly.

SICKLY : I. Unwell, weak : q.v. : रुग्ण (f. ग्णा). II. Of places etc. (1) रोगाकुल (f. ला), K.b. ; (2) गदोपसृष्ट (f. ष्टा), and sim. comp.s.

SICKNESS : I. Nausea : (1) विवमिषा (the feeling) ; (2) वमनम् (=vomiting) ; (3) छर्दिः (=2.) II. Illness : (1) पीडितता ; (2) असुस्थता ; (3) रोगिता : v. Also disease.

SIDE (subs.) : I. Of the body : (1) पार्श्व (mn.), *to sleep on the left s.* : वामपार्श्वे संविशति, Sr. ; *pain in the s.s* : पार्श्वशूलम्, Bha. ; *sleeping on the s.s* : पार्श्वशयः (यी, यं), S.k. ; (2) पक्षः (rare), R. v. 72. II. Of anything : पार्श्व (mn.), *in front, on the rear, and on the s.s.* : अग्रे पृष्ठे च पार्श्वयोः, A. r. vi. 1. 30. ; *rises from (this) s. of the Meru* : मेरोः पार्श्वात् प्रभवति, Mat. 120. 67. ; *keep them at the s.* : तं पार्श्वे कुर्वन्ति, K. ; *one who remains at the s.* (attendant) : पार्श्ववर्तिन् (f. नी); R. ii. 46. ; *s. by s.* (=abreast) : पार्श्वापार्श्वि (adv.) ; *two s.s of an equation*) : द्वौ पक्षौ, Vij. III. Party. : पक्षः, *the kings on the s.of Śiśupāla* : शिशुपालपक्षपृथिवीभृतां गणः, Si. xv. 47. ; *opposite s.* : प्रतिपक्षः, D.s. Ph. : *the gods were on the s.of Arjuna* : देवा अर्जुनतोऽभवन्, S.k. ; पाण्डवतोऽभवन्, Mah. viii. 87. 51. IV. Of consanguinity : पक्षः, *on the father's, mother's s.s.* : पितृपक्षे, मातृपक्षे, Mah. v. 140. 10. : v. Of an argument : पक्षः, *the first s.* : पूर्वपक्षः, S. VI. Of rivers : पारः, *take me on the raft to the other s. of the Jamunā* : प्रापयस्व परं पारं कालिन्द्या उडुपेन माम्. VII. Quarter : q.v. : (1) दिश् (f.) ; (2) gen. expr. with तस्, *on both s.s of the road* : उभयतः पथि, Mah. v. 83. 60. ; *on one s…on the other s.* : एकतः…अन्यतः, R. vi. 86. ; *on all s.s* : सर्वतः, R. ; *on the left s.* : वामतः, D. VIII. In geo. : भुजः (rarely बाहु *or* दोस्), *four-s.d* : चतुर्भुजः (जा, जं), Li. ; *s.s of a right-angled triangle containing the r.a* : भुजकोटी.

SIDE (adj.) : I. Lit. : by comp., *s.-wind* : पक्षवातः, Mah. : v. Side (subs.). II. Indirect : वक्र (f. क्रा).

SIDE (v.) : पक्षे भवति (भू, c. 1.) *or* पक्षं गृह्णाति (ग्रह्, c. 9.) (with gen.).

SIDEBOARD : no equiv. ; *फलकसज्जा.

SIDELONG : I. Adj. : वक्र (f. क्रा) : v. Oblique. II. Adv. : (1) पार्श्वतः (=on the side) ; (2) अनुपार्श्वम् (=laterally).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SIDEREAL : तारा- in comp., *s. year* : *तारावर्षः.

SIDEWAYS, SIDEWISE : (1) तिर्यक ; (2) तिरश्चीनम्.

SIDLE : तिर्यग् गच्छति (गम्, c. 1.), वि-सर्पति (सृप्, c. 1.), etc.

SIEGE : रोधः, अव-, नि-, *to raise a s.* : रोधं मुञ्चति *or* sim. व्यपायाति (या, c. 2. = to go away), Mah. iii. 19-26. Ph. : *to lay a s. to* : रुणद्धि (रुध्, c. 7.), Mah. iii. 15. 3. : v. To besiege.

SIESTA : दिवास्वप्नः and sim. comp.s : v. Sleep.

SIEVE : I. Subs. : (1) चालनी ; (2) तितउ (rarely n.). II. Verb. : v. To sift.

SIFT (v.) : I. Lit. : (1) शोधयति, वि-, परि- (c. of शुध् = to clean), *whose chaff and awn had been s.ed by the winnowing basket* : शूर्पशोधितकर्णीकशारुकादीन्, D. vi. ; (2) पृथक् करोति (= to separate), *s.ed the rice from the husk* : तुषैस्तण्डुलान् पृथक् चकार, D. vi. II. To examine minutely : (1) सूक्ष्मं निरूपयति (रूप्, c. 10.) ; (2) निपुणं परीक्षते (ईक्ष्, c. 1.).

SIGH : I. Subs. : दीर्घनिश्वासः. II. Verb : (1) दीर्घं निश्वसिति (श्वस्, c. 1.) ; (2) दीर्घनिश्वासं मुञ्चति, नि-, (मुच्, c. 6.), *or* त्यजति, परि-, (त्यज्, c. 1.), *or* सृजति, नि-, (सृज्, c. 6.) : v. Also to lament.

SIGHT (subs.) : I. The act. : (1) दृष्टिः ; (2) दर्शनम् ; (3) वि-लोकनम्, अव-, आ- ; (4) ईक्षणम्, प्र-, अव-. II. View : दृष्टिपथः, -मार्गः, -विषयः, -गोचरः, and sim. comp.s, *falling within s.* : आलोकपथावतारिन् (f. णी), Vi. ii. 45. III. Appearance, spectacle : q.v. : दर्शनम्, *as by their gay s.* : दर्शनेन लघुना यथा तयोः, R. xi. 12. IV. Eye : q.v. : (1) दृष्टिः, *diseases affecting s.* : दृष्टिगतरोगाः, Sr. ; (2) *sense of s.* : दर्शनेन्द्रियम् ; (3) दृश् (f. : rare), N.

SIGHT (v.) : (1) विलोकयति : v. To see. ; (2) by subs, and comp. : q.v.

SIGHTLY : (1) सुदर्शन (f. ना) ; (2) सुदृश्य (f. श्या) ; (3) दर्शनीय (f. या).

SIGN (subs.) : I. Mark, indication : (1) चिह्नम् (best equiv.), *by these s.s, her recognition of Nala* : चिह्नैरमीभिर्नलसंविदस्याः, N. xiv. 22. ; *with edicts under his s. manual* : स्वहस्तकृतचिह्नशासनः, Si. xiv. 36. ; (2) लक्षणम् ; *by these s.s, you will find out* : एभिर्लक्षणैर्लक्षयेथाः, Me. ii. 19. ; (3) लिङ्गम्, (*are*) *the general s.s of the disease insanity* : सामान्यमुन्मादगदस्य लिङ्गम्, Bha. ; (4) अभिज्ञानम् (for knowing, recognizing), M. n. II. A portent, presage : q.v. : (1) चिह्नम् ; (2) लक्षणम्. III. In math. etc. : चिह्नम्. IV. Signal : (1) संज्ञा, *Chitralekhā makes a s. to Vidūshaka* : चित्रलेखा विदूषकं संज्ञां लम्भयति, V. iii. ; (2) इङ्गितम् ; *one who understands s.s* : इङ्गितज्ञ (f. ज्ञा), K. V. In ast. : राशिः, *the s. of Leo* : सिंहराशिः, *when the sun was in the s. Aries* : मेषं गते पूषणि, C. r.

SIGN (v.) : I. To beckon : संज्ञां ददाति (दा, c. 3.), etc. II. To put one's signature to : नाम लिखति, अभि- (लिख्, c. 6.) *or* निवेशयति (c. of विश् = to enter) (with loc.), Y. ii. 88.

SIGNPOST : *संज्ञादण्डः ; मार्गयष्टिः.

SIGNAL : I. Subs. : संज्ञा : v. Sign (IV). II. Verb : संज्ञां ददाति (दा, c. 3.), लम्भयति (c. of लभ्), etc. III. Adj. : असाधारण (f. णी) : v. Uncommon, remarkable, great.

SIGNALIZE : कीर्तयति (कीर्त्, c. 10.) : v. To celebrate.

SIGNALLY : बलवत् : v. Greatly, exceedingly.

SIGNATURE : expr. by verb, *a debtor should put a s. with his own hand* : ऋणी नाम स्वहस्तेन निवेशयेत्, V. ii. 88.

SIGNET : मुद्रा : v. Seal. *S. ring* : मुद्राविशिष्टमङ्गुरी-(ली)यम्, -कम्.

SIGNIFICANCE : I. Meaning : q.v. : भावः. II. Importance, force : q.v. : गौरवम्.

SIGNIFICANT : I. Lit. : भावसूचक (f. चिका), व्यञ्जक (f. ञ्जिका), and sim. comp.s. II. Important, great : q.v. : गुरु (f. also र्वी).

SIGNIFICANTLY : (1) साकूतम् ; (2) ईरिताकूतम्, Ki., and sim. comp.s.

SIGNIFICATION : अर्थः : v. Sense (IV).

SIGNIFY : I. To mean : q.v. : expr. with अर्थः, *it s.ies nothing* : निरर्थकमेतत्. II. To betoken, indicate : q.v. : सूचयति (सूच्, c. 10.). III. To declare, inform : q.v. : कथयति (कथ्, c. 10.).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SIGNIOR : आर्यः : v. Sir.

SILENCE (subs.) : I. Lit. : (1) मौनम्, *better to keep s.* : वरं मौनं कार्यम्, H. ; *determining to break his s.* : तन्मौनभङ्गं चिकीर्षुः, Vet. ; *one who leaves off s.* : मुक्तमौनः, K. s. 77. 42. ; *one whose vow is to keep s.* : मौनव्रती, M. n. *or* वाचंयमः, R. xiii. 44. ; (2) निःशब्दता and sim. comp.s (=stillness) ; (3) शान्तिः, प्र- (=calmness). Ph. : *in the s. of midnight* : सुप्तजनस्तिमिते निशीथे, C. iii. II. Secrecy : q.v. III. Oblivion : q.v.

SILENCE (exclam.) : (1) तूष्णीम्भव ; (2) मौनं कुरु, -ष्व ; (3) शान्तम्.

SILENCE (v.) : I. Lit. : (1) मौनं लम्भयति (c. of (लभ् ; (2) मूकीकरोति, etc. II. Fig. : (1) निरुत्तरीकरोति (=to shut up) ; (2) प्र-शमयति ; (c. of शम्=to quiet) ; (3) निवारयति (वृ, c. 10.=to prevent).

SILENT : (1) मौनिन् (f. नी), *with s. steps* : चरणेन मौनिना, N. i. 124. ; *in some points you are s.* : कियत्सु मौनं (तव), N. ix. 15. ; (2) expr. with तूष्णीम् (rarely तूष्णीकः, -का, -कम्), *why are you s.* : किं भवान् तूष्णीमास्ते, V. ii. ; *seeing the bard become s.* : तूष्णीम्भूतं सूतपुत्रं निशम्य, Mah. iii. 134. 21. ; (3) मूक (f. का : poet), *with the birds s.* : मूकाण्डजम्, Ku. iii. 42. ; *when the lute became s.* : मूकीभूतवीणा, K. ; (4) निःशब्द (f. ब्दा), नीरव (f. वा), and sim. comp.s (= without any sound).

SILENT, BECOME : (1) मौनं भजते (भज्, c. 1.) etc. ; (2) उपशाम्यति (शम्, c. 4.) ; (3) विरमति (रम्, c. 1.) : v. To cease.

SILENTLY : (1) मौनेन (rare), K. s. ; (2) तूष्णीम् ; (3) जोषम्, Si. xvi. 16. ; (4) निःशब्दम् : v. Also secretly.

SILK : (1) क्षौमम् ; (2) कौशेयम् ; (3) पट्टः, -जम्, Mah. ii. 52. 26. ; (4) चीनम् (China-s.).

SILK,-EN (adj.) : कौशेय (f. यी), *of s. and woollen clothes* : कौशेयाविकयोः, M. v. 120. ; (2) कीटज (f. जा) ; (3) क्षौम (f. मा), *s. cloth* : दुकूलम्, *very fine pure s. cloth* : निःश्वासहार्ये शुचिनी दुकूले, K. : v. Also s. (subs.).

SILK-COTTON TREE : शाल्मलिः, -ली, -वृक्षः. Its gum : पिच्छा.

SILK-WORM : (1) कोश(ष)कारः ; (2) perh. पट्टकीटः ; (3) पुण्डरीकः.

SILKY : I. Silken : q.v. : II. Like silk : क्षौमाभ (f. भा), and sim. comp.s.

SILL : I. In gen : मूलम्. II. Of a door : देहली.

SILLINESS : मूर्खता : v. Foolishness.

SILLY : मूर्ख (f. र्खा) : v. Foolish.

SILT UP : perh. अवरुणद्धि (रुध्, c. 7.).

SILVAN : by comp., *s. scene* : वनभूमिः ; *s. diety* : वनदेवता, U.

SILVER (subs.) : (1) रूप्यम् ; (2) रजतम् ; (3) दुर्वर्णम् (rare).

SILVER (adj.) : (1) by comp., *s. coin* : रूप्यमुद्रा ; (2) रूप्यमय : (यी, यं) ; etc.

SILVER (v.) : रूप्येण छादयति (छद्, c. 10.=to cover : q.v. ?).

SILVER-LEAF : (1) रू(रौ)प्यपत्रम् ; (2) रजतपत्रम्, "एवं रजतपत्राणां विशुद्धिः सम्प्रजायते, Bha.

SILVER-MINE : (1) रजतखनिः ; (2) रूप्यमयी भूमिः, etc.

SILVERSMITH : (1) रूप्यकारः (?) ; (2) स्वर्णकारः (=goldsmith, who is also s. in India).

SILVERY : (1) मुक्तागौर (f. री=pearl-white), Si. iv. 44. ; (2) सुधासवर्ण (f. र्णा=nectar-coloured), Si. iv. 28. ; etc.

SIMILAR : सदृशः (शी, शं) : v. Like.

SIMILARITY : सादृश्यम् : v. Resemblance.

SIMILARLY : (1) तद्वत् ; (2) तथैव ; (3) एवम् (=so).

SIMILE : उपमा, *s.s of Kālidāsa* : "उपमा कालिदासस्य".

SIMILITUDE : (1) औपम्यम् : v. Simile, resemblance.

SIMMER : v. To boil.

SIMPER : विकृतं स्मयते (स्मि, c. 1.) : v. To laugh.

SIMPLE (adj.) : (1) सरल (f. ला), *very s. bolts* : सरलतराण्यर्गलानि, Vi. vi. 16. ; *your very s. good nature* : अतितरला तवेयं मधुरा सुजनता, K. ; *offending the s. (girl)* : सरलामपराध्य, J. ; *s. (commentary)* : सरला, S.k. ; (2) ऋजु (f. also ज्वी), *with s. arrows* : ऋजुभिर्बाणैः, Si. xx. 77. ; *with a s. bow* : ऋजुप्रणामक्रियया, R. vi. 25. ; *s. nature* : ऋजून् स्वभावान्, B. ii. 15. ; *with the s. eye* :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋजुनैव चक्षुषा, Ku. v. 32. : v. Also frank, guileless.

SIMPLE (subs.) : ओषधिः(धी) ; *s.s* : ओषधयः, Si.

SIMPLETON : मूढ (f. ढा) : v. Fool, -lish.

SIMPLICITY : (1) सरलता ; (2) ऋजुता ; (3) आर्जवम् : v. Also plainness, frankness, guilelessness.

SIMPLIFICATION : (1) सरलीकरणम् ; (2) ऋजूकरणम् ; (3) विशदीकरणम्.

SIMPLIFY : perh. (1) सरलीकरोति ; (2) ऋजूकरोति ; (3) विशदीकरोति (= to clear : q.v.).

SIMPLY : I. Merely, only : q.v. : केवलम् : v. Also mere. II. In other senses : perh. by adj.

SIMULATE : व्यपदिशति (दिश्, c. 6.) : v. To pretend.

SIMULATION : व्यपदेशः : v. Pretence.

SIMULTANEOUS : (1) समकालीन (f. ना) ; (2) एककालीन (f. ना) ; (3) by adv.

SIMULTANEOUSLY : (1) युगपत् ; (2) समम्, R. iv. 4. ; (3) समकालम् and sim. comp.s.

SIN (subs) : (1) पापम्, *becomes purified of all s.s* : सर्वपापेभ्यः पूतो भवति, V.s. ; (2) पातकम्, *attacked by the (passions), (men) s. about deadly s.s, great s.s, minor s.s, and venial s.s* : तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु प्रवर्तते, V.s. ; (3) पाप्मन् (m.), *is absolved of all s.s* : तरति सर्वं पाप्मानम्, Ga. ; (4) एनस् (n.), *he who commits a s. at night by action, in mind, or by words* : कर्मणा मनसा वाचा यदेनः कुरुते निशि, At. ; (5) अघम्, *s.-absolving (formula)* : अघमर्षणम्, Vi. ; (6) वृजिनम् ; (7) अंहस् (अंधस्) (n.).

SIN (v.) : पापं करोति, etc. : v. Sin (subs.).

SINCE (prep.) : (1) प्रभृति (with abl.), *s. seeing (you)* : दर्शनात् प्रभृति, K. ; *s. then* : तदा प्रभृति, Ku. v. 55. ; *ever s. he came to sight* : यतः प्रभृति स मम दर्शनपथं गतः, ततः प्रभृति, Sa. iii. ; (2) आ (with abl. or in comp. = from), *s. her birth* : आ जन्मनः, Sa. v. 27.

SINCE (adv.) : I. = s. then : तदा प्रभृति. II. = ago : *fifteen years s.* : इतः पूर्वं पञ्चदशवर्षे ; *long s.* expr. with : चिरम् : v. Long.

SINCE (conj.) : (1) यस्मात्, यतः *or* यत् (= as), Ki. xi. 14. ; (2) कुतः *or* कस्मात् (with abl. clause) : v. Because ; (3) हि : v. For.

SINCERE : (1) अकृत्रिम (f. मा = unaffected : q.v.) ; (2) यथार्थ (f. र्था = true, real : q.v.) ; (3) सरल (f. = simple, frank : q.v.) ; (4) विशुद्ध (f. द्धा = pure : q v.).

SINCERELY : expr. by adj. or circumlo. : v. Also guilelessly.

SINCERITY : (1) अकृत्रिमता (= unaffectedness) ; (2) विशुद्धता (= purity) ; (3) सरलता (= simplicity) ; (4) निर्व्याजता (= guilelessness) ; (5) यथार्थता (= genuineness, reality).

SINE : ज्यापिण्डः, -कः (?). Ph. : *versed s.* : उत्क्रमज्या.

SINECURE : *to hold a s. appointment*, perh. नामकर्मण्यधिकृत (f. ता).

SINEW : I. Lit. : स्नायुः. II. In pl., fig. : बलम् : v. Strength.

SINEWY : I. Lit. : स्नायुमयः (यी, यं). II. Vigorous, firm : q.v.

SINFUL : I. Of persons : (1) पापिन् (f. नी), *very s.* : पापीयस् (f. सी) ; (2) पातकिन् (f. नी) ; (3) पापात्मन् (mfn.) ; (4) पापकर्मन् (mfn.) ; (5) पापकृत् (mfn.) ; etc. II. Of acts ; पाप- in comp.

SINFULLY : expr. by circumlo.

SINFULNESS : पापपरायणता and sim. comp.s (of men) : v. Also wickedness.

SING : (1) गायति (गै, c. 1.), *I s. and dance and play* : गायामि नृत्याम्यथ वादयामि, Mah. iv. 11. 8. ; *s.s (a song) expressing different states in its four feet* : चतुष्पदवस्तुकं गायति, Mal. i. ; *sang to whom the entire Veda* : यस्मै ब्रह्मपारायणं जगौ, Vi. i. 14. ; *where with choristers s.ing out the fame of the Lord of wealth* : उद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम्, Me. ii. 10. ; *the female bee sang* : मधुकराङ्गनयोज्जगे, Si. vi. 20. ; (2) of birds : कूजति (कूज्, c. 1.), *what the male cuckoo sang sweetly* : पुंस्कोकिलो यन्मधुरं चुकूज, Ku. ii. 32.

SINGE : उपदहति, परि- (दह्, c. 1.), *and my skin is s.d* : त्वक् चैव परिदह्यते, G. i. 30.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SINGER : (1) गायन (f. नी) ; (2) गायक (f. यिका) ; (3) by verb or comp.

SINGING (subs.) : I. Of men : (1) गीतिः, -तम्, *adapted to s.* : गीतिक्षम (f. मा), Sa. vii. 5. ; *time for s.* : गीतसमयः, Mr. iii. 5. ; (2) गानम् ; (3) गेयम्, *who taught you s.* : गेये को नु विनेता वाम्, R. xv. 69. II. Of birds : (1) कूजितम् *or* कूजनम् ; (2) रुतम् (=sound), Ki.

SINGING (adj.) : I. Of men : गायत् (f. न्ती), J. II. Of birds : मधुरस्वरः (रा, रं=sweet toned), and sim. comp.s.

SINGING-MASTER : perh. गीतशिक्षकः *or* गीताचार्यः (स शिक्षयामास च गीतवादितम्, Mah. iv. 11. 12.) : v. Also musician.

SINGLE (adj.) : (1) एक (f. का) : v. Alone. Ph. : *not a s. man* : न कोऽपि ; *s. combat* : नियुद्धम्.

SINGLE (v.) : gen. with *out* : निर्दिशति : v. To point out.

SINGLE-HANDED : एक (f. का), *Śiva s. took the cities of the enemy* : एकोऽहरद्रिपुपुराणि हरः, Dh. : v. Alone.

SINGLE-STICK : (1) यष्टिः ; (2) दण्डः.

SINGLY : I. Alone : q.v. : एक (f. का). II. One by one : (1) एकैकम् ; (2) एकैकशः ; (3) प्रत्येकम्.

SINGSONG : गाथिका (?).

SINGULAR : I. Single : एक (f. का), *s. number* : एकवचनम्, Sa. II. Remarkable, unparalleled : q.v. : (1) अपूर्व (f. र्वा) ; (2) अपरूप (f. पा=odd : spe. in bad sense) : v. Also strange.

SINGULARITY : (1) अपूर्वता (uncommonness) ; (2) अपरूपता (=oddness) ; (3) विशिष्टता (=particularity).

SINGULARLY : (1) अपूर्वम् ; (2) अपरूपम् ; (3) विशिष्टम्.

SINISTER : I. Inauspicious : q.v. : अमङ्गल (f. ला). II. Crooked, wrong, vicious : q.v. : दुष्ट (f. ष्टा). III. Left : q.v. : वाम (f. मा).

SINK (subs.) : भ्रमः, Si. iii. 33. : v. Drain.

SINK (v.i.) : I. Lit. : मज्जति, नि-, परि-, (मस्ज्, c. 1.), *the vessel sank in the sea-waters* : पोतः समुद्राम्भस्यमज्जत्, D. ; *sunk in deep mire* : महापङ्के निमग्नः, H. i. ; *of the half s.ing sun* : सामि मज्जति रवौ, Ki. ix. 5. ; *sunk in the calamity from water which cannot be easily got over* : मग्नस्य तोयापदि दुस्तरायाम्, Si. xiv. 86. II. To penetrate deep : निविशते (विश्, c. 6.). III. To decrease, fall : ह्रासमुपैति (इ, c. 2.), अधिगच्छति (गम्, c. 1.), etc. IV. To go to destruction : सीदति, अव-, (सद्, c. 1.), M. : v. Also to decline.

SINK (v.t.) : I. To submerge, plunge : q.v. : मज्जयति, नि-, परि- (c. of मस्ज्), *or s. him in water* : अप्सु चैनं निमज्जयेत्, M. viii. 114. II. To dig : q.v. : खनति (खन्, c. 1.). III. To degrade, ruin : q.v. : अवसादयति (c. of सद्). Ph. : *s.ing fund* : *शोधनसारः.

SINLESS : (1) अपापः (पा, पं) ; (2) अनघः (घा, घं) ; (3) निरेनस् (mfn.) ; (4) वीतकल्मषः (षा, षं) and sim. comp.s.

SINNER : (1) पापिन् (f. नी) ; (2) पातकिन् (f. नी) ; (3) पापकर्मन् (mfn.) ; (4) पापात्मन् (mfn.) ; (5) पापकृत् (mfn.) ; etc.

SINUOSITY : (1) वक्रता ; (2) वक्रिमन् (m.) ; (3) कुटिलता.

SINUOUS : (1) वक्र (f. क्रा) ; (2) कुटिलः (ला, लं) ; (3) अरालः (ला, लं).

SIP (v.) : (1) उपस्पृशति (स्पृश, c. 6.) ; (2) आचामति (चम्, c. 1.), *s.s the drops of sweat on your face* : आचामति स्वेदलवान् मुखे ते, R. xiii. 20.

SIP (subs.) : (1) आचमनम् ; (2) उपस्पर्शः. *To take a s.* : v. To sip.

SIPHON : a tube : *क्षेपणी, उत्-.

SIR : आर्यः, *whence have you come, s.* : कुत आर्यः, Mr. ii. ; *remove s.s* : अपसरत आर्याः, Mr. x. Ph. : *"my good s."* : भद्रमुख.

SIRE : I. Of kings : देवः. II. Of holy men : भगवत् (m.). III. Of father : तातः, Vi. IV. Author, creator : q.v.

SIREN : मोह(हि)नी (?).

SIRLOIN : *s.of beef* : गोकटिः (after Bha.).

SIRNAME : v. Surname.

SIROCCO : A WIND : *सौरवातः.

SIRRAH (interj.) : रे, रेरे, अरे, *or* अरेरे.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SISTER : (1) भगिनी (any sort of s.) ; (2) स्वसृ (f.=. : rare), R. ; (3) सहोदरी, सोदर्या *or* सगर्भा (=by the same mother). *Elder s.* : अग्रजा, *Younger s.* : अवरजा, *S.'s son* : (1) भागिनेयः ; (2) स्वस्रेयः (rare). *S.'s daughter* : (1) भागिनेयी ; (2) स्वस्रेयी *or* स्वस्रि(स्त्री)या (rare).

SISTER-IN-LAW : (1) ननान्दृ (f.) (=husband's sister) ; श्याली (wife's s.) ; (3) प्रजावती *or* भ्रातृजाया (=brother's wife) ; (4) यातृ (f.) (=husband's brother's w.).

SISTERHOOD : I. Lit. : भगिनीत्वम् (?). II. A society : भगिनीवर्गः, भगिनीसमाजः, etc.

SISTERLY : (1) भगिनीसन्निभः (भा, भं) and sim. comp.s. ; (2) by adv. भगिनीवत्, etc.

SIT (v.i.) : I. Lit. : (1) आस्ते (आस्, c. 2.), *s. ting on the altar* : वेदिकायामासीन (f. ना), Ku. iii. 44. ; *s. by* : उपास्ते *or* अन्वास्ते, R. i. 56. ; *s. on or in* : अध्यास्ते, R. vi. 10. ; (2) निषीदति (सद्, c. 1.), *s. when she s.s.* : निषण्णायां निषीदास्याम्, R. i. 89. : v. To sit down. Ph. : *to s. idly* : निष्कर्मन् (mfn.) तिष्ठते *or* sim. शेते (शी, c. 2. : fig.), मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते, Mr. i. II. As a court : perh. आस्ते, Mit. III. To incubate : q.v. : perh. आस्ते, उपविशति (विश्, c. 6.). IV. To fit. : q.v.

SIT (v.t.) : अध्यास्ते : v. Sit (1).

SIT DOWN : I. To take one's seat : q.v. : उपविशति (विश्, c. 6.), *s. for a moment* : मुहूर्तमुपविशतु, Sa. i. II. In mil. : expr. with तिष्ठति (स्था, c. 1.) : v. Also to besiege.

SIT UP : I. Lit. तिष्ठति (स्था, c. 1.), R. i. 89. II. To watch : जागर्ति (जागृ, c. 2.), *by s. ting up late at night* : रात्रिजागरणात्.

SITE (subs.) : I. Situation, position : (1) सन्निवेशः, *s. of the zenana* : अन्तःपुरसन्निवेशः, D. iii. ; (2) संस्थानम् *or* संस्थितिः. II. Place : भूमिः etc., *with s.s of dwelling houses* : वसतिवेश्मभिः, Ki. ix. 29.

SITTING (subs.) : I. The act : expr. by verb. II. Seat : आसनम्.

SITUATE,-D : (1) निविष्ट (f. -ष्टा), सं-, *s. on the banks of the Sarayū* : निविष्टः सरयूतीरे, Ram, ; (2) अवस्थित (f. ता) ; (3) संस्थित (f. ता) ; (4) -स्थ (f. -स्था) in comp.

SITUATION : I. Location : (1) निवेशः, -नम्, सं- ; (2) संस्थानम् *or* अवस्थानम् (स्थितिः). II. Post, employment : q.v. : पदम्.

SIX : षष्, *s.-faced* : षण्मुख (f. खी) ; *s. oxen* : षड्गवम् ; *with the remaining s. lotuses* : षड्भिः शेषपद्मैः, Li. ; *and s. were seen in the thread* : दृष्टं षट्कञ्च सूत्रे, Li. 24.

SIXTEEN : षोडशन्, *S.-th.* : षोडशः (शी, शं), *s.-fold* : षोडशगुणितः (ता, तं), Li.

SIXTH : (1) षष्ठ, (f. ष्ठी), *with a third, one-fifth, and a s.* : त्र्यंशपञ्चांशषष्ठैः, Li. 23. ; *he was s. in descent from the moon* : सोमाद्बभूव षष्ठोऽयम्, Mah. v. 139. 3. ; (2) षाष्ठ (f. ष्ठी) (rare). *S.-ly* : षष्ठतः.

SIXTIETH : षष्टितमः (मी, मं), "षष्टितमोऽध्यायः", Mah.

SIXTY : षष्टिः, *of s.-two and half* : सार्धद्विषष्टेः, Li. ; *s.-first* : एकषष्टितमः (मी, मं) *or, rarely* एकषष्ट (f. ष्टी), S.k. ; *s.-nine* : ऊनसप्ततिः, एकोनसप्ततिः, *or* rarely नवषष्टिः, एकान्नसप्ततिः.

SIZE (subs.) : मानम्, प्र-, परि-, *what is its s.* : यत्प्रमाणमिदम्, V. p. ii. 2. 3. : *of great s.* : अतिप्रमाण (f. णा), K. ; *befitting their s.* : स्वप्रमाणानुरूप (f. पा), Sa. i. : v. Also shape, extent, measure.

SIZED : big-s. : बृहत्प्रमाण (f. णा) : v. Size.

SKATE (subs.) : I. A fish : शंकुः, शङ्कुचिः, *or* शङ्कोचः. II. An ice-shoe : no equiv. : *नीहारपादुका, -नाली.

SKATE (v.) : *नीहारपादुकया विसर्पति (सृप्, c. 1.).

SKE(A)IN : पञ्जिः (ञ्जी), पिञ्जिः (ञ्जी), प(पि)ञ्जिका.

SKELETON : I. Lit. : (1) कङ्कालः, *mules reduced to s.* : कङ्कालशेषाः खराः, U. iii. 42. ; (2) अस्थिपञ्जरः, A. II. Fig., outline : गठनम् (??).

SKETCH (v.) : आलिखति (लिख्, c. 6.) : v. To draw, portray.

SKETCH (subs.) : per पाण्डुलेखः, -लेख्यम् ; चित्रारम्भः. (in drawing : ?), R. ii. 31. : v. Also plan, description.

SKEWER : I. Subs. : शलाका. II. Verb. : शलाकया बध्नाति (बन्ध्, c. 9.). : v. To fasten.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SKIFF : तरणी : v. Boat.

SKILFUL, SKILLED : (1) कुशलः (ला, लं), *I am s. in breaking and treating horses* : कुशलोऽस्म्यश्वशिक्षायां तथैवाश्वचिकित्सिते, Mah. iv. 2. 4. ; (2) निपुण (f. णा), *s. in conversing about mythological and historical anecdotes* : पुराणेतिहासकथालापनिपुणः, K. ; (3) विचक्षण (f. णा), *must be a s. master of horses* : ध्रुवं हयज्ञो भविता विचक्षणः, Mah. iv. 3. ; (4) प्रवीण (f. णा), *s. in painting, bold in gambling* : चित्रकर्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, K. ; (5) पटु (f. also टी) ; (6) विशारदः (दा, दं) ; (7) चतुरः (रा, रं) (=shrewd) ; (8) दक्ष (f. क्षा =dexterous) ; (9) प्रौढ (f. ढा), प्रगल्भ (f. ल्भा), विदग्ध (f. ग्धा), पेशल (f. ला) (poet. = well up) ; (10) अधीतिन् (f. नी) *or* पठितिन् (f. नी) (=well-read) ; (11) भद्र (f. द्रा=good) ; (12) अभिज्ञ (f. ज्ञा=knowing) ; etc. N.B. (1) to (11) are cons. with loc., or rarely with dat., or inf. and (12) with gen. They are all used in comp.

SKILFULLY : (1) कुशलम् ; (2) निपुणम् ; (3) चतुरम् ; (4) सपाटवम् ; (5) कौशलेन, etc.

SKILFULNESS, SKILL : (1) कौशलम्, *greatest s.* : परं कौशलम्, K. ; (2) नैपुण्यम्, *s. in stirring anecdotes* : चित्रकथानैपुण्यम्, D. ; (3) पाटवम्, *s. in riding elephants, horses, and other animals* : मातङ्गतुरङ्गादिवाहनारोहणपाटवम्, D. ; (4) प्रावीण्यम्, *not so much with their s.* : न तथोभयोः प्रावीण्येन, R. xv. 6. ; (5) वैचक्षण्यम् ; (6) निपुणता ; (7) चातुर्यम् (=cunning) ; (8) दाक्ष्यम् (=dexterity) ; (9) अभिज्ञता (=knowledge) ; etc.

SKIM (v.) : I. To remove the scum : फेनं गालयति (c. of गल्) *or* स्रावयति, वि- (c. of स्रु), *or* निर्हरति (हृ, c. 1.) (with gen.) ; II. To pass over gently : perh. परिसर्पति (सृप्, c. 1.).

SKIMMER : (1) झर्झरम्, -री, Bha. ; (2) खजा (a. ladle), Mah.

SKIM-MILK : घोलम्, "घोलं तु मथितं तक्रम्", Bha.

SKIN (subs.) : (1) चर्मन् (n.) (=animal), *covering with a tiger -s.* : व्याघ्रचर्मणा प्रच्छाद्य, H. iii. ; *splitting of the s.* (a disease) : चर्मदलम्, Bha. ; (2) त्वच् (f.) (general), *and of a serpent when the s. is cast off* : फणावतश्च त्वचि विच्युतायाम्, Ki. xvii. 45. ; *clad in the pure s. of Ruru, he...* : त्वचं स मेध्यां परिधाय रौरवीम्, R. iii. 31. ; *reduce to mere s. and bones* : त्वगस्थिमात्रशेषः (षा, षं) ; (3) अजिनम् (=hide), *s. of an elephant* : गजाजिनम्, Ku. v. 67. ; (4) दृतिः (=leather : rare) ; (5) poet. by deriv. *in a sheath of goat -s.* : पाञ्चनखे कोषे, Mah. 42. 14.

SKIN (v.) : I. To remove the s. : चर्म *or* त्वचम् अपोहति (उह्, c. 1.) etc. (with gen.). *S.ned* : वि- *or* अप-लोमत्वच् (mfn.), D. viii. II. Of wounds etc. : *a wound s.s over* : व्रणस्योपरि चर्म जायते.

SKIN-DEEP : चर्मगतः (ता, तं) : v. Superficial.

SKIN-FLING : बद्धमुष्टि (mfn.) : v. Miser, miserly.

SKINNY : चर्मभूतः (ता, तं) (?) : v. Lean, withered.

SKIP (v.) : प्लवते (प्लु, c. 1.) : v. To leap, frisk, omit.

SKIP,-PING (subs.) : प्लुतम् : v. Leap.

SKIRMISH : I. Subs. : डिम्बः, -आहवः. II. Verb : expr. by subs.

SKIRT (subs.) : (1) प्रान्तः : v. Border ; (2) दशा (of a garment).

SKIRT (v.) : expr. by subs. : v. To adjoin ; border.

SKITTISH : (1) चपल (f. ला) : v. Wanton ; (2) कातर (f. रा) : v. Timid.

SKITTISHNESS : (1) चपलता : v. Wantonness ; (2) कातर्यम् : v. Timidity.

SKITTLES : a play : *नवगुटिका.

SKULK (v.i.) : निभृतं तिष्ठति, (स्था, c. 1.) : v. To lurk, hide.

SKULL : (1) कर्परः ; (2) कपाल (mn.), *the old necklace of Brahmā's s.s* : पुरातनीं ब्रह्मकपालमालाम्, Ku. xii. 17. ; *a s. for begging* : भिक्षाकपालम्, K. ; (3) शिरोऽस्थि (=as capitis) ; (4) करोटिः (=3), Vi. v. 19.

SKULL-CAP : (1) शिरस्कम् ; (2) शिरस्त्रम् ; etc.

SKUNK : an animal : *गन्धवीरः.

SKY : (1) नभस् (n.), *s. -blue* : नभस्तलश्यामः (मा, मं), R. xviii. 6. ; *quickly descending from the*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

s.ies : नभोविभागात्तरसावतीर्य, N. iii. 1. ; *thunder fell from a cloudless s.* : पपात वज्रं नभसो निरम्बुदात्, Ku. xv. 20 ; (2) व्योमन् (n.), *s. -touching* : व्योमस्पृश् (mfn.), Si. iv. 31. ; (3) आकाशः, *picturesque scene drawn in the s.ies without any foundation* : आकाशे रचितमभित्ति चित्रकर्म, Si. iv. 53. ; (4) गगनम्, *residents of the s.* : गगनसदः, Si. iv. 53. ; (5) अन्तरि(री)क्षम्, *then a voice from the s. loudly proclaimed* : अथान्तरिक्षे वागुच्चैः प्राह, V.p. v. 28. 21. ; (6) अम्बरम्, *s. lighting* : अम्बरविकाशिन् (f. नी), Si v. 3. ; (7) खम्, *ambling in the s.* : खे खेलगामी, Ku. vii. 49. ; (8) द्यौः (=heaven : q.v.), *s.-bird* : द्युपक्षी, Ku. xv. 14. ; (9) विहायस् (n.) ; (10) वियत् ; (11) गीर्वाणवर्त्म, K., Ki. v. 17. and sim. comp.s. (poet.).

SKYEY : आकाशनिभः (भा, भं=like the sky) ; (2) दिव्य (f. व्या=heavenly.)

SKYLARK : भरद्वाजः : v. Lark.

SKYLIGHT : *आकाशप्रकाशः : v. Window.

SLAB : शिला (=stone : q.v.).

SLACK (adj.) : शिथिल (f. ला), *with the bow-trings s.* : शिथिलज्याबन्ध (f. न्धा), Sa. ii. 6. ; (2) श्लथ (f. था), वि-, परि-, *with the ties s.* : श्लथबन्ध (f. न्धा)., V.t. : v. Also loose, slow.

SLACK,-EN (v.) : I. Trans : (1) शिथिलयति, *I shall not s. the opportunity of serving* : नाहं सेवावसरं शिथिलयिष्ये, Sa. iii. ; (2) श्लथयति (nomi.) ; (3) शिथिलीकरोति, *s.ed his hopes about the life of his father* : पितरि जीविताशां शिथिलीकरोति, K. ; (4) श्लथीकरोति. II. Intrans. : (1) शिथिलायते ; (2) शिथिलीभवति, *tie the s.ed dress* : शिथिलीभूतमाकलय दुकूलम्, K.

SLACKLY : (1) शिथिलम्, Sa. ii. 9. ; (2) श्लथम्, R. v. 69. ; (3) शैथिल्येन.

SLACKNESS : (1) शिथिलता, -त्वम् *or* शैथिल्यम्, *from s. of memory* : स्मृतिशैथिल्यात्, Sa. vii. ; (2) श्लथता, वि-, परि- (rare).

SLAG : मलम् : v. Dross.

SLAIN (adj.) : हत (f. ता), नि- etc. : v. To kill, slay.

SLAKE (v.) : I. To quench, extinguish : q.v. : प्रशमयति (c. of शम्). II. घोलयति, *refine sugar s.ed in cold water* : जलेन शीतलेनैव घोलिता शुभ्र-शर्करा, Bha. III. To go out, be extinguished : q.v. : प्रशाम्यति (शम्, c. 4.).

SLAM : v. Bung.

SLANDER (subs.) : अपवादः : v. Scandal, calumny, accusation.

SLANDER (v.) : अपवदति (वद्, c. 1.) : v. To defame, calumniate, accuse.

SLANDERER : (1) असूयक (f. यिका) : v. Detracter ; (2) अपवादक (f. दिका), : v. Accuser.

SLANDEROUS : (1) by comp. ; (2) परिवादिन् (f. दिनी) ; (3) परिवादगर्भ (f. र्भा) ; (4) व्यपवादकर (f. री) ; (5) सापवाद (f. दा) ; (6) आक्षारिन् (f. णी).

SLANDEROUSLY : (1) सापवादम् ; (2) सासूयम् ; (3) परिवादगर्भम्.

SLANG : (1) प्रलापः (देशभाषारूपं लुप्तवर्णमधिकवर्णं क्वचिद्विकृतवर्णञ्च पदजातम्), Mah. i. 143. 19. ; *s. of the boatmen* : नाविकप्रलापः (?) ; (2) अपभाषा (?).

SLANT,-ING (adj.) : अवसर्पिन् (f. णी) : v. Also oblique.

SLANTINGLY : तिर्यक् : v. Obliquely.

SLAP (subs.) : (1) चपे(र्प)टः ; (2) चपेटिका ; (3) चपेटप्रहारः.

SLAP (v.) : (1) चपेटेन हन्ति (हन्, c. 2.), प्रहरति (हृ, c. 2.), आयतं छिनत्ति (छिद्, c. 1.), etc. : v. To strike.

SLASH (v.) : I. Lit. : आयतं छिनत्ति (छिद्, c. 7.) *or* निकृन्तति (कृत्, c. 7.). II. Fig. : chiefly in s.ing : अरुन्तुद (f. दा), *when the mind is s.ed* : गाढं क्षते मनसि, Ni.

SLASH (subs.) : (1) आयतच्छेदः ; (2) महाच्छेदः ; (3) अतिच्छिन्नम्, Ni.

SLATE : *शिलाटः.

SLATE : (Adj.) *शैलाटः, -कः : v. Also tiler.

SLATTERN : v. Slut.

SLAUGHTER : (subs.) : (1) विशसनम्, *vast s.* : घोरं विशसनम् ; (2) कदनम्, *the s.er of innocent Kshatriyas* : निरपराधराजकुलकदनं, Vi. iii. ; (3) घातः (=killing : q.v.), *s. of the army by the enemy* : परैः सैन्यघातः, Mah. vi. 108. 28. ; (4) घातनम्, Ku. xv. 8. ; (5) वैशसम्, *half-s.* : अर्ध-वैशसम्, Ku. iv. 31. : v. Destruction.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SLAUGHTER (v.) : विशसति (शस्, c. 1.), *a calf has been s.ed* : वत्सतरी विशसिता, U. iv.

SLAUGHTERHOUSE : सू(शू)ना ; *its owner* : सौनिकः.

SLAVE (subs.) : I. Lit. : दासः (f. सी), (*s.s*) *home-bred, bought, got and hereditary* : गृहजातक्रीतलब्धपारम्परीणाः, Viv. ; *who wishes to make his s. a free man* : यः स्वं दासमदासं कर्तुमिच्छेत्, N. s. ; *it is s.'s property, the master is not entitled to it* : तद्दासधनं स्वामी नार्हति, Viv. ; *even a free woman married by a s. becomes a s.* : दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्, Kat. ; *a born s.* : गर्भदासः (f. सी), Mr. ; *eating female and male s.s* : दासीदासजनं भक्षयित्वा, D. vi. ; *I am your attendant s. with a thousand s. girls* : अहं दासीसहस्रेण दासी ते परिचारिका, Mah. i. 77. 22. II. Fig. (1) दासः ; (2) expr. by वश, *a s. of the passions* : इन्द्रियपरवशः (शा, शं) : v. Give way.

SLAVE (v.) : I. Trans : दासीकरोति, K. II. Intrans. : (1) दासायते. (nomi.) ; (2) दास्यं *or* दासकर्म करोति.

SLAVER (subs.) : I. A slave-merchant : दासवणिज् (m.) (?). II. A slave-ship : दासवहनपोतः, etc. (?). III. Saliva : q.v. : लाला.

SLAVER (v.) : लालायते (nomi.) ; by phrases.

SLAVERY : (1) दास्यम् ; (2) दासत्वम्, -ता ; (3) दासभावः, etc.

SLAVE-TRAFFIC, SLAVE-TRADE : दासविक्रयः.

SLAVISH : (1) दास- in comp. : v. Servile ; (2) by adv. दासवत्.

SLAVISHLY : दासवत् (lit. and fig.).

SLAVISHNESS : expr. by circumlo. : v. Servility.

SLAY (v.) : (1) मारयति (c. of मृ) : v. To kill ; (2) शातयति (c. of शत्), "तदानीकमशातयत्", Mah. vii. 157. 27. : (3) विशसति (शस्, c. 1.) : v. To slaughter ; (4) सूदयति, वि-, विनि- (सूद्, c. 10.), *s.ing many animals* : सूदयन् विविधान् मृगान्, Mah.

SLAYER : (1) विशसितृ (f. त्री) ; (2) by subs. in comp., *s. of Madhu* : मधुसूदनः ; *s. of Bala* : बलनिसूदनः, R. ix. 3. : v. Also killer.

SLEDGE : No equiv. : *श्लक्ष्णयानम्, श्लाक्ष्णम्.

SLEDGE-HAMMER : (1) मुद्गरः ; (2) महाघनः.

SLEEK : श्लक्ष्ण (f. क्ष्णा) : v. Smooth, glossy.

SLEEP (subs.) : (1) निद्रा, *overtaken by s.* : निद्रया गृहीतः, Va ; *I was overpowered with s.* : निद्रया परामृष्ये, D. ; *to go to s.* : निद्रां याति *or* गच्छति, K. ; *to break s.* : निद्रां भनक्ति *or* भिनत्ति, Ma. n. ; *does not s. comes to us today* : आवयोर्निद्राद्य किमु नोपसद्यते, N. ; *was sent to long s.* (i.e. death) ; दीर्घनिद्रां प्रवेशितः, R. xii. 18. ; *without having s.* : अनुपजातनिद्र (f. द्रा), K. ; *very sound s.* : अतिपक्वनिद्रा, D. ; *dead s.* : घोरनिद्रा, K. ; *aroused from s.* : विनिद्र (f. द्रा), B. ; (2) rarely स्वप्नः, स्वापः, *or* सुप्तिः, *in s.* : स्वप्ने, D. ; *fond of s.* : प्रियस्वप्न (f. प्ना), K. xii. 81. ; (3) शयनम्, *went to s.* : शयनमगमत्, Ram. ii. 92. 24.

SLEEP (v.) : (1) स्वपिति, प्र-, अव-, सम्-, (स्वप्, c. 2.) (lit. and fig.), *I will go and s. in the gatehouse* : द्वारशालायां गत्वा स्वप्स्यामि, Mr. ; *s.ing at proper time* : यथाकालं स्वपन्, R. ; (2) निद्राति (द्रा, c. 2.), *slept pressing each other* : पीडनां विदधतौ निदद्रतुः, N. ; (3) निद्रायते, (nomi.), Mah. ; (4) शेते (शी, c. 2.) (prop.=to lie down) (lit. and fig.), *s.ing calmly* : विश्रब्धं शयानम्, Mah. ; *I will not be s.ing over it* : मयास्मिन्वस्तुनि शयानेन न स्थीयते, Mu. ; *s.ing with the face down* : अवमूर्द्धशयः, S. k. ; (5) संविशति (विश्, c. 6.) (=शेते), *shall s. on the left side* : वामपार्श्वेन संविशेत्, Sr.

SLEEP-PRODUCING : (1) स्वापन् (f. नी), प्र-, R. vii. 61. ; (2) निद्राजनन (f. नी) *or* -जनक (f. निका), M. n. ; (3) निद्राकर (f. री) ; and sim. comp.s.

SLEEPER : I. Lit. : (1) expr. by verb ; (2) निद्रालु (mfn.) ; (3) शयालु (mfn.). II. A beam : *संवेशतुला.

SLEEPILY : (1) सनिद्रम्, Si. xi. 18. ; (2) expr. by adj. निद्रावशः (शा, शं), निद्राभिभूतः (ता, तं).

SLEEPINESS : नैद्रतन्द्रा : v. Sleep, sleepy.

SLEEPING (subs.) : शयनम् ; (2) rarely स्वापः, सुप्तिः, *or* स्वप्नः.

SLEEPING-DRAUGHT : निद्राजनकमौषधम् (see Bha. on "निद्रानाशः").

SLEEPING-HOUSE : (1) शयनगृहम् ; (2) स्वप्ननिकेतनम् and sim. comp.s (rare), B. xi. 17.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SLEEPING-PARTNER : भोगसहकारिन् (f. णी).

SLEEPLESS : (1) नष्टनिद्र (f. द्रा), and sim. comp.s, *passed the night s. ly* : उत्सन्ननिद्रा क्षपां क्षपितवती, K. ; (2) निर्निद्र (f. द्रा : rare). N.B. विनिद्र and उन्निन्द्र are commonly applied to *awaking after sleep*.

SLEEPLESSNESS : (1) निद्रानाशः (as a disease), Bha. ; (2) निर्निद्रता ; (3) निद्राभावः and sim. comp.s.

SLEEPY : I. Inclined to sleep : (1) निद्रावशः (शा, शं) ; (2) निद्राभिभूतः (ता, तं) ; (3) निद्रापरतन्त्र (f. न्त्रा), M. n. ; (4) निद्राविधेयः (या, यं), R. vii. 62. ; and sim. comp.s. Ph. : *to feel s.* : (=wish to sleep) : (1) सुषुप्सति ; (2) शिशयिषते, Si. xi. 22. ; (3) निदिद्रासति, Si. xi. 4. II. Causing sleep : निद्राप्रद (f. दा), Bha.: v. Sleep-producing. III. Belonging to sleep : नैद्र (f. द्री), "नश्यन्नैद्रतन्द्रः" Si. xi. 5.

SLEET : Perh. तुषारवर्षः.

SLEEVE : (1) पिप्पलः (?), Wilson ; (2) आस्तरणम् (? ; comp. Astin). Ph. : *to laugh in one's s.* : अन्तर् हसति (हस्, c. 1.) : v. To laugh.

SLEIGH : no equiv. : *श्लदणयानम् ; श्लादणम्.

SLEIGHT : *s. of hand* : perh. हस्तलाघवम् : v. Also jugglery.

SLENDER : (1) तनु (f. also न्वी), प्र-, *a s. girl* : तन्वी, R. vi. 25. ; *a s. plant* : तन्वी लता, R. xiii. 32. ; *having s. command of language* : तनुवाग्विभव (f. वा), R. i. 9. ; *to make s.* : तनूकरोति, R. vi. 80. ; (2) कृश (f. शा), परि-, *having a s. belly* : कृशोदर (f. री), Ku. v. 42. ; *having s. limbs* : कृशाङ्ग (f. ङ्गी), N. iii. 11. ; *by s. results* : कृशेन फलेन, Sa. vi. 11. : v. Also small, feeble.

SLENDERLY : (1) तनु, प्र- ; (2) कृशम्, परि- ; (3) by adj. : v. Also little.

SLENDERNESS : (1) तनुता, -त्वम्, Ku. iv. 13. ; (2) कृशता, -त्वम्, परि- ; (3) कार्श्यम्, परि- ; (4) तानवम् (rare).

SLICE : Subs. : I. खण्ड (mn.) : v. Bit, piece. II. Verb : खण्डीकरोति : v. To cut up.

SLIDE (v.) : I. To glide, move : q.v. : विसर्पति (सृप, c. 1.). II. To slip : q.v.

SLIDE, -ING (subs.) : I. The act : विसर्पः, -णम्. II. The place : अवसर्पः *or* विसर्पः. III. In machinery : *विसर्पः.

SLIGHT (adj.) : (1) तनु (f. also न्वी) : v. Slender ; (2) अल्प (f. ल्पा) : v. Little. Ph. : *not the s. est* : न मनागपि : v. Least ; *in a s. degree* : ईषत् : v. Little (adv.).

SLIGHT (v.) : उपेक्षते (ईक्ष्, c. 1.) : v. To disregard, neglect.

SLIGHT (subs.) : उपेक्षा : v. Disregard, neglect, contempt.

SLIGHTER : उपेक्षक (f. क्षिका) : v. Also despiser.

SLIGHTINGLY : (1) सावज्ञम् ; (2) अनादृत्य : v. Contemptuously.

SLIGHTLY : ईषत् : v. Little, somewhat.

SLIGHTNESS : (1) तनुता : v. Slenderness ; (2) अल्पता : v. Smallness.

SLILY : (1) छलेन ; (2) चतुरम् (=cunningly).

SLIM : तनु (f. also न्वी) : v. Slender.

SLIME : श्यानकर्दमः and sim. comp.s. : v. Mud.

SLIMINESS : (1) श्यानता ; (2) चिक्कणता : v. Slimy.

SLIMY : (1) श्यान (f. ना) ; (2) चिक्कण (f. णा= glossy) ; (3) पङ्किल (f. ला=muddy).

SLING (subs.) : I. For throwing : (1) गोफणा (?), Wilson ; (2) दोला (? : used in Bengalee). II. For bandage : *श्लथालम्बः.

SLING (v.) : I. To throw : q.v. : क्षिपति (क्षिप्, c. 6.). II. To hang : q.v. : उद्बध्नाति (बन्ध, c. 9.).

SLINK : व्यपयाति (या, c. 2.) : v. To creep away, flee.

SLIP (v.i.) : I. Lit. : स्खलति (स्खल्, c. 1.), *her feet s. ping at every step* : पदे पदे प्रस्खलन्ती, K. II. Fig. : स्खलति, प्र-, *letting words s.* : वचनानि स्खलयन्, Ku. iv. 12. : v. Also to fall. *To let s.* : क्षिपति, अव-, (क्षिप्, c. 6.=to throw : q v.), *opportunities s* : क्षिप्तकाल (f. ला), Sa. iii. 27. III. To s. off : स्रंसते (स्रंस्, c. 1.), *the Gāṇḍiva s.s off from my hand* : गाण्डीवं स्रंसते हस्तात्, G. i. 30. IV. To s. away : व्यपयाति (या, c. 2.) : v. To escape, flee. V. To s. in : अलक्षितम् आ-विशति, समा- (विश्, c. 6.).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SLIP (v.t.): I. To let s. : q.v. : क्षिपति (क्षिप्, c. 6.). II. To convey secretly : अलक्षितं ददाति (दा, c. 3.) : v. To put. III. To let loose : q.v. : मुञ्चति (मुच्, c. 6.).

SLIP (subs.) : I. Lit. : (1) स्खलनम् ; (2) स्खलितम्. II. Fig., mistake, fault : q.v. : स्खलनम् *or* स्खलितम्, *how shall I cover this s.* : केनेदं स्खलितं प्रच्छादयामि, K. ; *when there is s. of tongue* : गोत्रेषु स्खलितो यदा भवति, Sa. vi. 4. III. A twig : q.v. : विटपः. IV. Of paper etc. : खण्ड (mn. : ?).

SLIPPER : पादुका : v. Shoe.

SLIPPERINESS : पिच्छिलता : v. Slippery.

SLIPPERY : I. Lit. : पिच्छिल (f. ला), *in the battle-field s. with mud. (formed by) blood* : रणाङ्गने शोणितपङ्कपिच्छिले, Ku. xvi. 50. II. Unstable, uncertain : q.v. : अस्थिरः. III. Of men : चपलः (ला, लं), Sa. ii.

SLIPSHOD : fig. : perh. शिथिल (f. ला= slack).

SLIT : Subs. : दीर्घच्छेदः. II. Verb : दारयति (दृ, c. 10.) : v. To send.

SLOGAN : क्ष्वेडितम् : v. Shout.

SLOOP : पोतविशेषः.

SLOP (subs.) : I. Water carelessly thrown : expr. by circumlo. II. In pl., common clothes : स्थूलपटः. III. Dirty water : q.v. : अमेध्यं जलम्.

SLOPE (subs.) : (1) अवसर्पिणी भूः, -मिः (=declivity) ; (2) प्रवणः (णा, णं), Wilson ; (3) perh. अवसर्पः.

SLOPE (v.) : I. Trans. : (1) प्रवणीकरोति ; (2) आवर्जयति (वृज्, c. 10.). II. Intrans. : (1) प्रवणीभवति ; (2) अवसर्पति (सृप्, c. 1.).

SLOPING (adj.) : (1) प्रवण (f. णा) ; (2) अवसर्पिन् (f. णी).

SLOPPY (adj.) : पङ्किल (f. ला) : v. Muddy.

SLOTH : I. Idleness : q.v. : तन्द्रा, *sleep, s.* : निद्रा, तन्द्रा, H. i. 33. II. The animal : no equiv. : *तन्द्रावहः.

SLOTHFUL : (1) तन्द्रित (f. ता), *without being s.* : अतन्द्रिता सा, Ku. v. 14. ; (2) तन्द्रालु (mfn.) ; (3) अलस (f. सा=idle : q.v.).

SLOTHFULLY : (1) by adj. ; (2) तन्द्रया ; (3) आलस्येन (=idly), *or* अलसम् (Si. viii. 7.).

SLOTHFULNESS : (1) तन्द्रालुता ; (2) तन्द्रा (=sloth).

SLOUCHING (adj.) : प्रलम्ब (f. म्बा,=hanging down : ?).

SLOUGH (subs.) : I. Of a snake ; (1) निर्मोकः, *to cast off s.* : निर्मोकं विमुञ्चति, R. xvi. 17. ; (2) कञ्चुकः, *a venomous snake with the s. shorn off* : विगलत्कञ्चुकः पन्नगेन्द्रः, Vi. vi. 53. II. Of a wound : perh. कैञ्चुकः *or* कोषः (comp. vernacular). III. A deep miry place : महापङ्कः.

SLOUGH (v.) : स्खलति (स्खल्, c. 1.), *in the third week, it dries and s.s off* : ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्, Bha.

SLOVENLINESS : perh. अव्यवस्था : v. Carelessness, negligence.

SLOVENLY : perh. अव्यवस्थितः (ता, तं) : v. Careless, negligent.

SLOW : (1) मन्द (f. न्दा), *s. motion* : मन्दगतिः, P.h. ; *s. digestion* : मन्दाग्निः, Sr. ; *having s. poison* : मन्दविषः, J. ; *being s. I did not see that my companions would perceive it* : सखीजनोऽप्युपलक्षयतीति मन्दया न लक्षितम्, H. ; *to help s. minds* : मन्दात्मानुजिघृक्षया, K. ; *are not s.* : न मन्दायन्ते, Me. i. 41. ; (2) मन्थर (f. रा), *the s. maid* : मन्थरा, Ram. ; *s. to recognize* : प्रत्यभिज्ञानमन्थर (f. रा), Sa. iv. ; (3) विलम्बित (f. ता=delayed), *quick and s.* : द्रुतविलम्बित-, P.h.

SLOWLY : (1) मन्दम् *or* मन्दं मन्दम्, Me. i. 9. ; (2) मन्थरम्, Ki. iv. 17. ; (3) by comp. ; *s. pressed* : मन्दाक्रान्त (f. न्ता). Ph. शनैः *or* शनैः शनैः, K.

SLOWNESS : (1) मन्दता ; (2) मान्द्यम् ; (3) मन्थरता (rare).

SLOW-WORM : *मन्थरः.

SLUG : v. Snail.

SLUGGARD, SLUGGISH : (1) *तन्द्रालु (mfn.) : v. Slothful ; (2) मन्द (f. न्दा) : v. Slow.

SLUGGISHLY : (1) by adj. ; (2) मन्दम् : v. Slowly.

SLUGGISHNESS : (1) तन्द्रालुता ; (2) मान्द्यम् (slowness) ; (3) जाड्यम् (=stupor).

SLUICE : I. Flood-gate : *रोधद्वारम्. II. Stream : q.v. : प्रवाहः.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SLUMBER : I. Subs. : स्वापः : v. Sleep. II. Verb : स्वपिति (स्वप्, c. 2.) : v. To sleep.

SLUR : I. Subs. : कलङ्कः : v. Stain, disgrace. II. Verb. : कलङ्कयति (nomi.) : v. To soil, pollute, disgrace.

SLUT : (1) अविनीता ; (2) बन्धकी ; (3) दुःशीला ; etc.

SLUTTISH : अविनीत (f. ता) : v. Untidy, careless.

SLY : (1) धूर्त (f. र्ता) : v. Rogue ; (2) चतुर (f. रा) : v. Cunning ; (3) दाम्भिक (f. की) : v. Hypocrite.

SLYNESS : (1) धूर्तता ; (2) चतुरता ; (3) दाम्भिकता : v. Sly.

